170. Hence the eternal Brahman is, as it were, embodied with Ātmic and An-ātmic vehicle or veiling; of which the ātmic vehicle transcends everything.

171 & 172. Therein abides in unison the Brahmic energy or potency of manifold elements; and as such it is said that the supreme form of the Brahman is shakti. Therefore those are deemed the most revered that are the devotees of the Brahmic shakti.

173. Others are known as the devotees of the Ātma and the lowest are those who, being proficient in the Tantra, are devoted to the worship of the Prakriti.

174. It is the opinion of the great sage that the devotees of the Brahman, not being the devotees of the Shakti also, are vain of successful endeavour.

175. The wise man with pure intent engaged in action appropriate to himself attains to the supreme condition whence he doth not return.

176. Therefore knowledge by synthesis or co-ordination is praiseworthy; and siksha accords with knowledge only with the help of the science of Pranava.

177. Because knowledge of that science gives insight into its reverse also, so is Pranava said to connote the one and the many.

178. It has been pointed out by the great sage that limited perception leads to the notion of many-ness and that transcendent perception results in the realisation of unity.

179. That is said to be the supreme achievement which results in the perception chastened by Raja-Yōga.

180. The meditation upon the absolute Ātman is said to be Raja-Yōga; that which is the Brahman is evident in five-fold manner.

181. Of which the detail is declared by the Suddhas thus :—the Purusha, the Paramātma, the Ātma, the Jiva and the Akshara.

182. Of these, the fifth, the Purusha, is the highest, the fourth is the Paramātma and the third is the Ātma.

183. The second is known as the Jiva and the first as Akshara; the Brahman conjoined with the Samsāra or the world-process thus abides with qualities and action.

184. The Suddhas who are all Yōgins do perceive in their own bodies the eternal splendour of the Brahman thus five-fold.

185. By Gobhila has been described in detail the Raja-Yōga devoted to the Brahman.

186 & 187. But Gargyayana herein says that the eternal Brahman abides as Ātma, the Pramātma, the Sūtrātma, Prathyagātma and the Jivātma.

188. One only is the supreme Brahman veiled, as it were, in white and sable forms (perhaps in light and darkness) shining verily as Ātma and An-ātma.

189. As is the form or embodiment or the manifestation of the Brahman, so are the Vidya or sciences; such studies are ordained in respect of persons in accordance with their authority and responsibility.



190. Thus in the exposition of the Pranava the totality or the whole conjoined into unity or many-ness is triplenatured; and four are the states of consciousness.

191 & 192. In this manner through the last subsections the eternal Brahman cognisible by study of all sciences has been explained to be five-fold by the great sage; the knower of the Brahman by means of Yōga ever attains unto the supreme state.

THUS THE FIFTH CHAPTER OF THE PRANAVA VADARTHA DEEPIKA ENTITLED THE BRAHMA - SWAROOPA-NIRUPANAM BY YOGANANDA.

---

M. P. WORKS, MOUNT ROAD, MADRAS.



SREE-LA-SREE AMBALAVANA DESIKAR AVERGAL,
HEAD OF THE TIRUVADUTHORAI MUTT, TANJORE DT.

ॐ

शिवमयम्

श्री ल श्री

**श्रीमत्कैलासनाथपरंपरागतमठदिव्यज्ञानाचार्य-
पीठाधिपतीनां अंबलवाणदेशिकानाम् ।**

# अत्रायमुपोद्घातः

**नमः शिवाय गुरवे गोमुक्तिक्षेत्रमूर्तये ।
महाकैलासनाथाय परस्मै ब्रह्मणे नमः ॥**

आर्या महाभागाः !

विदितमेव हि तत्रभवतामिदम्, यदद्य श्रीमान् जगद्विख्यातकीर्तिः. डाक्टर्. सर्. यस्. सुब्रह्मण्यार्यः, संस्थाप्य हि स्थाने प्रकाशकस्य प्रख्यातविद्वद्वंशसंग्रहीतशास्त्रार्थरत्नं च पण्डितश्रीनिवासाचार्यं शुद्धधर्ममण्डलप्रबन्धानखिलांश्च संप्रकाशयन्नास्त इति । इदानीं तु तत्र प्रणववादार्थदीपिकासहितश्च प्रणववादप्रथमभागः, योगदीपिका, अध्यायानां च षट्त्रिंशत्या विभक्ता च श्रीभगवद्गीता, सनातनधर्मदीपिकाप्रथमभागः, प्रणववादद्वितीयभागश्चेत्येते प्रबन्धाः सन्ति मुद्रिताः प्रकाशिताश्च । किं च तेषां

प्रबन्धानां प्रत्येकमप्यस्त्युपोद्घातप्रबन्धः सरसगीर्वाणवाणीसमलङ्कृतस्तत्तत्प्रबन्धरहस्यार्थविशेषपरिमण्डितः प्रामाणिकसत्पण्डिताभिनन्द्यश्च पण्डितप्रकाशकविरचितः । अस्त्येवं तत्सुब्रह्मण्यार्यविरचितश्चाङ्गिलोपोद्घातोऽपि तादृशानां चाध्यात्मविद्याविचारपराणां प्रभूणामतीव रमणीयः । प्रशस्तौ च तावुभावुपोद्घातौ हि तत्तत्प्रबन्धार्थजिज्ञासुभिः प्रथमं सप्रेमभरं विज्ञेयौ भवेतामित्यस्माकमाशयः । किं च प्रकाशकहस्ताद्धि ते प्रबन्धाः सन्ति नः सगौरवं संप्रदापिताश्च तत्सुब्रह्मण्यार्येण । तथा समभ्यर्थिताश्च वयं शुद्धधर्ममण्डलप्रबन्धप्रकटनाभिवृध्यै, तत्तत्प्रबन्धार्थविचारसञ्जातप्रमोदानुरूपयोग्यतापत्रिकाप्रदानाय च । तत्र च भृशं कृतज्ञैरस्माभिः प्रणववादद्वितीयभागस्य तथान्येषां तन्मण्डलप्रबन्धानां च मुद्रापणे सप्रमोदं यथाशक्ति द्रव्यदानेनोपकुर्वद्भिश्च, एतन्मण्डलप्रबन्धविषया च योग्यतापत्रिकाऽपि दत्तास्ति । किं च तत्पण्डितसुब्रह्मण्यार्ययोरभ्यर्थनया, महता च प्रबन्धगौरवेण, ह्यस्माकं तत्प्रणववादद्वितीयभागस्य यथाप्रज्ञमुपोद्घातप्रबन्धरचनायां संभवति प्रवृत्तिः । तस्मादित्थं विरच्यते सोऽयमुपोद्घातप्रबन्धो ह्यस्माभिः ।

अस्ति च सहृदयैरिदं विज्ञेयम्—स एव हि भवत्युपोद्घातः, यश्च तत्तत्प्रबन्धप्रतिपाद्यार्थनिर्णायकः तदर्थबुभुत्सुप्रवृत्तिजनकश्च भवति । तत्तत्प्रबन्धार्थनिर्णयस्तु सुदृढया परीक्षया हि प्रकाशते । सेयं परीक्षा तु भवति नानैकान्तिकी, किं तु विना च स्वार्था-



ग्रहं सद्भिर्निगमनोपहिता हि सा प्रशस्यते । तदिदं खलु प्रेक्षावतामभ्युदयदं भवति, यद्धि तेषां निष्पक्षपातं तत्तच्छास्त्रपरीक्षकस्थानाधिरोहणम् । परं तु तत्स्थानाधिरोहणसाधनीभूता च शक्तिर्हि न सामान्यतः सर्वेषां संभवति, तस्याः स्वार्थाग्रहत्यागमूलत्वात् । स्वार्थाग्रहश्च—तत्तच्छास्त्रस्य तु प्रतिपाद्यार्थाश्च सादरं विज्ञेयाः, इति सद्विद्वत्स्वरूपानुरूपनिष्ठाभावरूपो भवति । किं च सर्वेष्वपि कार्येषु तत्स्वार्थाग्रहदोष एवायं भवति महांश्च प्रतिबन्धकः स्वकार्यसिद्धौ हि विदुषाम् । स एव हि तत्तत्प्रबन्धार्थोपलब्धिसाधनदृष्टिमावृणोति मेघ इव रश्मिमन्तम् । न केवलमयं दोषश्च पण्डितानामसाधारणम्, किं तु लोकाभ्युदयपरान्पण्डितान्प्रभुवर्यानपि नाटयति भूतगण इव प्राणिनः । विदितमेवेदानीमयं तत्र तत्र भवति । अस्तु नामैतत् । चकास्ति च प्रज्ञादृष्टिस्तु तत्तच्छास्त्रप्रतिपादितार्थविशेषविज्ञानादेव विपुला । न ह्यन्यशास्त्रार्थविचारात्स्वसमयशास्त्रावधेयसिद्धान्तार्थमोहः संभवेदधिकारिणामिति वक्तुं युक्तम्, यतश्च सर्वसमयशास्त्रार्थपरिज्ञानादेव भवति स्वसमयशास्त्रप्रतिपाद्यसिद्धान्तार्थनिर्णय इति हि पण्डितसमयसिद्धम् । आह चैवं हि विद्यानाथः प्रतापरुद्रीयस्यालङ्कारशास्त्रस्य प्रणेता—“ सर्वविद्याधिकत्वं हि पाण्डित्यं परिकथ्यते ” इति । तस्मात्सद्भिः परीक्षकैः स्वार्थाग्रहभरमन्यत्र निक्षिप्य सादरं विचार्यो भवति शास्त्रार्थः साधुरसाधुर्वेति । अयमेव हि प्राज्ञोपदेशः—शैववैष्णवादिदर्शनावलंबिनो हि महापुरुषाः, परित्यज्य स्वार्थाग्रहं समबु-

द्वयः, अपरित्यजन्तश्च स्वस्वरूपानुरूपं च धर्मं स्वस्वदर्शनप्रवर्तकाः, तत्तद्दर्शनशास्त्रार्थविचारेण तत्तदधिकारिस्वरूपानुरूपं च धर्मं विजानन्तस्तत्तत्समयलोकाभ्युदयमाशंसमानाः, स्वधर्मपरधर्मयोश्च साम्यवैषम्ये च स्वविशुद्धतुल्यबुध्या हि विमृशन्तः, स्वसमयनिश्चितस्वधर्मकार्याश्च भवन्तीति। अतो वयं श्रीकैलासनाथपरंपरागतदिव्यज्ञानाचार्यपीठं च सच्छैवसमयनियतं माठाधिपत्यमधिष्ठिता अपि प्रबन्धानिमांश्च सामोदं सम्मानयामः। अयमेव भवति सामान्यतो मठाधिपतीनां परमो धर्मः।

अस्ति च सिद्धान्तः सर्वेषामास्तिकानामस्ति ब्रह्मेति चैक एव। परं तु तद्ब्रह्मणः सगुणत्वनिर्गुणत्वादिस्वरूपपरिकल्पनेन, शिवविष्ण्वादिनामरूपनिर्णयेन च भवति समयभेदः। तत्तत्समयनिर्वाहकास्त्वाचार्याः स्वशास्त्रेषु सयुक्तिकप्रमाणबद्धोक्तिप्रत्युक्तिरूपैश्च वाक्यैः प्रधानतः स्वेष्टं साधयन्ति, प्रसङ्गात्परवादिनश्च खण्डयन्ति। न तेषां परवादिनिग्रह एव तात्पर्यमिति वक्तुं युक्तम्, तत्तद्दर्शनपराणां सर्वेषामास्तिकानां च परमपुरुषार्थस्य साक्षाद्वा परंपरया वा सिद्धत्वात्। अत एव हि सर्वेश्वरस्य सर्वदर्शनोपास्यत्वं तत्तद्दर्शनाधिकारिस्वरूपानुरूपपुरुषार्थप्रदातृत्वं वैषम्यनैर्घृण्यविरहेण समत्वं च शास्त्रसिद्धमित्युच्यते। यथा—

"समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः।
ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम्॥



ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः॥"

इति, श्रीभगवद्गीता भवति। किं च, अस्ति ब्रह्मविद्यापरेषु प्राचीनेष्वाधुनिकेषु च शास्त्रेषु—आत्माऽनात्मानौ, क्षराऽक्षरौ, भावाऽभावौ, जीवाऽजीवौ, मायामायिनौ, लोकाऽलोकौ, चिदचिदौ, पशुपाशौ, चेत्यादिव्यवहारः। एतद्द्वित्वमनुसृत्यैव नित्याऽनित्ये, सत्याऽसत्ये, ज्ञानाऽज्ञाने, सदसती, बन्धमोक्षौ, धर्माऽधर्मौ, व्यापकाऽव्यापकौ, कार्यकारणे चेत्यादिव्यवहारश्च। सति च किमनयोर्लक्षणं कथं वा ह्यनयोर्योगो वियोगश्चेति विचारे, यथानुभवं तैस्तैश्च प्रमाणैस्ते च निर्णयन्ति, तत्तद्दर्शनाचार्याः। अस्ति चाभ्यां परः परमात्मा तृतीयश्च ब्रह्म। इदमेव हि तत्त्वत्रयं भवति। यथा तथा वापि व्याख्यायते शास्त्रेषु तेषु चैतत्तत्त्वत्रयमेव तत्तत्समयाचार्यैः। वदन्ति च केचिदार्याः—व्यवहारदशायामेवैतत्तत्त्वत्रयम्, न पारमार्थिकदशायां चेति। यथा तथा वापि तैश्च तद्ब्रह्मणस्त्रित्वैकत्वमभ्युपगन्तव्यं भवेत्। तत्त्वत्रयमेव ह्युपासकानां धर्मपराणां च सत्यभावनया विज्ञेयमित्यस्माकं सिद्धान्तः। तदनुरोधेनैव कर्मज्ञानभक्तियोगाश्च तत्तदधिकारिसंसारनियता भवन्ति। तस्मात्सर्वेषामास्तिकानां सत्यपि समयभेदे, तत्तत्सामयिकशास्त्रार्थविज्ञाने, तत्प्रकटने, तत्तत्समयप्रवर्तकपण्डिताहर्णे च, न वयं हि दोषं समीक्षामहे। इदमेवास्मत्कुलसमयसिद्धं धनम्।

प्रणववादश्चायं प्रबन्धो महर्षिगार्ग्यायणविरचित इति तदुपोद्घातप्रबन्धादिभिश्च पूर्वैर्विज्ञायते । प्रबन्धममुमधिकृत्यास्मत्कर्णपथमागच्छति प्रवृत्तिश्च नानाविधा । परं तु बहवो महाभागाः पण्डिता राजानश्च प्रबन्धममुं तथान्यांश्च मण्डलप्रबन्धान्सम्मानयन्ति । एवं सर्. यस्. सुब्रह्मण्यार्यश्च तदेतेषां प्रबन्धानां प्रकटने च बद्धकङ्कणो भवति । अतः सोऽयं प्रबन्धश्च निष्पक्षपातं सादरं भवति च विचार्य एवेत्यस्माकमीदृशी प्रवृत्तिः । केचिदमुं प्रबन्धमार्षमिति, केचिच्चानार्षमिति, केचित्तु वर्णाश्रमधर्मनाशकमिति, अपरे तु सनातनधर्मप्रतिपादकमिति चादृष्ट्वैवैतत्प्रबन्धमाचक्षते । परं तु नास्माकं त्वेतादृशविचाराधिकारो हि प्रशस्यत इति प्रबन्धार्थ एव विचार्यो भवति । न केवलं प्रबन्धावतारविचारः, विना च प्रबन्धदर्शनं दूषणं भूषणं वा, प्रकृतप्रबन्धप्रतिपाद्यार्थसाध्वसाधुत्वनिर्णायकमस्ति । किं च न दृश्यतेऽत्रैवंविधः षोडशसहस्रग्रन्थात्मकः प्रणवव्याख्यानरूपश्च प्रबन्धो ह्यवरः । इदमेकं च सन्तोषस्थानमस्त्यस्माकम् । प्रबन्धकृता च शास्त्रारंभे प्रथमप्रकरणप्रथमतरङ्गे “इदं प्रणवशास्त्रं सार्वत्रिकम्, न केवलं वेदान्तपरम्, न मैमांसिकम्, न नैयायिकम्, न च वैशेषिकम्, न यौगिकम्, न सांख्यमिति च विज्ञेयम्, सर्वस्यैतदन्तर्गत्वात् । इदं च सर्वेषां वेदानां तदङ्गोपाङ्गानां शास्त्राणां च मूलं भवति । तस्मात्सर्वस्येदं मूलभूतमिति व्याख्यातम्” इति प्रणवस्वरूपाभिवर्णनपूर्वकं च स्वप्रवृत्तिरभिहितास्ति । अत एव हि शास्त्रेऽस्मिंश्च सर्वशास्त्राणां तदर्थानां च प्रणवार्थेन समन्वयः क्रियते महर्षिणा । निर्विवादश्चायमर्थो विदुषां भवेत् । न चैवं महाविष्णोः परत्वस्य तु “तत्र प्रणवस्वरूपो महाविष्णुः, स च सर्ववेदस्वरूपः । अतः विष्णुः ब्रह्मा शिवश्च विज्ञेयो भवति” इति तृतीयप्रकरणतृतीयतरङ्गारंभे प्रतिपादनाद्वैष्णवमिदं शास्त्रमिति वाच्यम्, महाविष्णुशब्देन सर्वब्रह्माण्डाधिकारिपुरुषस्वरूपस्यैव प्रतिपादनात् । तदुक्तमस्मिन्नेव प्रकरणे द्वितीयतरङ्गे—

“ध्यायन्तु चेश्वरं नित्यं शुक्लवर्णं चतुर्भुजम् ।
शङ्खचक्रगदापद्मवनमालाविभूषितम् ॥
कौस्तुभाभरणं देवं नीलपीतांबरावृतम् ।
अनन्तमव्ययं रूपं निर्गुणं सगुणात्मकम् ॥”

इति । अत्र च “ईश्वरश्चाधिपतिस्वरूपः । अधिपतेः कार्यमेव भवति चतुर्भुजत्वम् । शुक्लवर्णं च ज्ञानेच्छाक्रियासमाहाररूपं प्रकाशात्मकं देवं ध्यायन्तु । शङ्खचक्रगदापद्मवनमाला इत्यत्र शङ्खशब्देन शब्दः’ चक्रशब्देन कालः, तयोः संबन्धश्च सदा संसरणरूपः । पद्मशब्देन संसरणम् । वनमालाविभूषणशब्देन सर्वस्य चैकत्वमावश्यकमिति चावधेयम् । एवं नीलपीतांबरं तमःप्रकाशयुक्तम्, कौस्तुभं सर्वेण संबद्धम् । निर्गुणं निषेधरूपम्, सगुणं रूपसंज्ञासहितम् । ध्येयमिति तदर्थः” इति महर्षिणैव भवति तच्छ्लोकार्थोऽभिवर्णितः । एवं तत्रैव—

"महाविष्णोः परं चैवमनन्ता गतिरव्यया ।
चतुष्टयक्रमं तत्र तादृशं विद्धि सर्वशः ॥"

इति, महाविष्णोः परमपि संसारस्य विद्यमानत्वं तदधिपतित्वं च विज्ञायते । एवं शिवस्यापि—

"शेते सर्वेषु भूतेषु सर्वसंहारकारकम् ।
त्रिनेत्रं पञ्चवक्त्रं च मुण्डमालाविभूषितम् ॥
व्याळमालाकुलं नित्यं परेशं पार्वतीपतिम् ।
नमामि जगदाधारं सर्वानन्दाभिगामिनम् ॥"

इति, तृतीयप्रकरणे चाष्टमे तरङ्गे सर्वोपास्यत्वमुक्तं भवति । अत्रत्यशिवत्रिनेत्रपञ्चवक्त्रमुण्डमालाव्याळादिपदानां च रहस्यार्थश्च महर्षिणैव प्रतिपादितो भवति । एवं तत्रैव—

"अकारोकारयोर्योगः कैलासः परमो गिरिः ।
तिष्ठते शङ्करस्तत्र भूतप्रेतादिसंयुतः ॥
नित्यं हालाहलं पीत्वा सर्वस्वं च विनश्यते ।
ज्ञात्वा विनाशं तेनैव तस्य नाशानुभावनात् ॥
अहमश्चैतदश्चैवं पूज्यतास्ति यथायथम् ।
शिवसन्दर्शनेनैवं सर्वशोको विनश्यति ॥
तद्विभूतिधरः प्राप्नोत्यखिलां संपदं सदा ।
आपदं हरते नित्यं धर्मकामार्थदायिनीम् ॥"



इति, प्रणवार्थत्वेन शिवस्वरूपं तदधिष्ठानस्वरूपं तद्धृतविभूतिस्वरूपं शिवभक्तमहिमा च सरहस्यं प्रतिपादितम् । किञ्चैवं तत्रैव—

"एतानि पञ्च शिवमन्त्रपवित्रितानि
भस्मानि कामदहनांगविभूषितानि ।
त्रैपुण्ड्रकेण रचितानि ललाटदेशे
लुंपन्ति देवलिखितानि दुरक्षराणि ॥"

इति, शिवविभूतिधारणस्य महिमा च प्रतिपादितास्ति । एवं शक्तेः स्वरूपं तस्याश्चोपास्यत्वं च तृतीयप्रकरणे सप्तमतरङ्गे प्रतिपादितम् । यथा—

"एषा च परमा विद्या शक्तिरूपा सनातनी ।
महाप्रतिष्ठिता चैषा सर्वस्थित्यन्तकारिणी ॥
शक्त्या चोत्पाद्यते सर्वं शक्तिरिच्छा परायणी ।
शक्त्या विनश्यते सर्वं शक्त्या सर्वस्थितिर्भवेत् ॥
इच्छा चावश्यकी नित्या हीच्छैवावश्यके सदा ।
तस्माच्छक्तिः परा सर्वा सर्वसिद्धान्तकारिणी ॥
सृष्टिस्थितिलयानां च शक्तिरेव हि कारणम् ।
आवश्यकपरं सर्वमतः शक्तिपरा क्रिया ॥
देव्या यया ततमिदं जगदात्मशक्त्या
निश्शेषदेवगणशक्तिसमूहमूर्त्या ।

तामंबिकामखिलदेवमहर्षिपूज्यां
भक्त्या नतास्मः विदधातु शुभानि सा नः ॥''

इति । एवं शक्तेरेव मायास्वरूपत्वं जगत्कारणस्य च ब्रह्मणस्तद्वैशिष्ट्यं च—

"सत्वं मायात्मकं ब्रह्म माया ब्रह्मात्मिका भवेत् ।
ब्रह्ममायाद्वयोर्योगे संसारानुप्रदर्शनम् ॥
यद्ब्रह्म त्रितयं रूपमात्मानात्मनिषिद्धकम् ।
माया त्रयावश्यकी च तया भेदो ह्यनन्वयः ॥
मायानन्यद्भवेद्ब्रह्म परं हृदयगोचरम् ।
ब्रह्मानन्या भवेन्माया सर्वमूलोपकारिणी ॥''

इति, तत्रैव सप्तमतरङ्गे प्रतिपादितम् । एवं तत्रैव—

"को वेत्ति भूमन्भगन्परात्मन्
योगेश्वरी क्रीडति च त्रिलोक्याम् ।
कथा कथं वा कति वा कदेति
विस्तारयन्क्रीडसि योगमायाम् ॥''

इति, भगवतः सर्वजगत्कारणभूतस्य परमात्मनः शक्तिश्च योगमायेति कथिता भवति । तस्मादत्र ब्रह्मस्वरूपसिद्धानां तत्तदधिकारिभिरुपास्यानां च मूर्तीनां स्वरूपं सरहस्यं च निरूपितं भवति महर्षिणेति विज्ञेयम् । एवं मूर्तीनां तत्त्वस्वरूपाभिवर्णनेन तत्तदुपासकानामुपास्यान्तरे द्वेषबुद्धिरपि न जायत इति च विज्ञेयम् ।



किं च शास्त्रेऽस्मिंश्च सर्वशास्त्राणां तदर्थानां च प्रणवार्थेन हि समन्वयश्च महर्षिणा क्रियते । निर्विवादश्चायमर्थः शास्त्रेषु । अतो मुमुक्षुभिश्च ब्रह्मविचारपरैरयं प्रबन्धः सम्यग्विचार्य एवेत्यस्माकमाशयः ।

अस्त्ययमोङ्काराख्यः प्रणवश्चाकारोकारमकारात्मक इति तु सर्वदर्शनसिद्धमेव । अत्रेदमवधेयम्—वस्तुत्रयमवलंब्यैव हि विद्याः सर्वा अपि प्रवर्तन्ते । विद्याकार्यं च संसारे भवति । संसारश्चतुर्विधः । प्रतिपुरुषमपि संसारचातुर्विध्यमस्ति । तथा चैवं त्र्यक्षरेण च चतुष्टयस्वरूपेण समष्टिव्यष्टयवस्थेन प्रणवेन, सर्वविद्यार्थाश्च विचारिता भवन्तीति मुनेर्मतमिति । तस्माद्विद्यास्वरूपस्य प्रणवस्य चैवमेव भेदः शास्त्रसंमतः । तदुपासकानां योगिनामन्येषां च नये हि प्रणवस्य सहस्रशो हि भेदः कल्पनीयः स्यात् । अत एव नारदपरिव्राजकोपनिषदि अष्टमोपदेशे तु अष्टाविंशत्युत्तरशतमात्रत्वं प्रणवस्योच्यते । यथा च तदर्थः "अकारोकारमकारार्धमात्रनादबिंदुकलाः कलातीता शान्तिशान्त्यतीतोन्मनी मनोन्मनी पुरी मध्यमा पश्यन्ती परा चेति सन्ति प्रणवस्य षोडशकलाः । भवन्त्यासां चतुर्भिः परिवर्तनेन चतुःषष्टिमात्राः कलाः । तथा तासां च प्रकृतिपुरुषद्वैविध्यादष्टाविंशत्युत्तरशतमात्रा भवन्ति प्रणवस्येति । एवंविधं प्रणवस्वरूपं च तत्रैवेत्थमुक्तम्—

"सर्वाधारः परं ज्योतिरेष सर्वेश्वरो विभुः ।
सर्वदेवमयः सर्वप्रपञ्चाधारगर्भितः ॥

सर्वाक्षरमयः कालः सर्वागममयः शिवः ।
सर्वश्रुत्युक्त ओं मृग्यः स कालोपनिषन्मयः ॥
भूतभव्यभविष्यद्यत्त्रिकालोदितमव्ययम् ।
तदप्योङ्कारमेवाद्य विद्धि मोक्षप्रदायकम् ॥"

इति । अस्त्यत्र च प्रणवोपासकानां ध्येयवस्तुस्वरूपं च साङ्गमभिहितम् । अस्य मन्त्रस्वरूपत्वे तत्सर्वमन्त्राद्योच्चारितत्वमुच्यते । अत एव मन्त्राणां परममन्त्रत्वमस्य शास्त्रसिद्धम् । अत एव च मन्त्रतन्त्रशास्त्रेषु, प्रणवस्य, ऋषिः छन्दः देवता च, तथा अङ्गन्यासकरन्यासौ च सर्वमेतच्च ध्येयवस्तुस्वरूपनिर्णयपूर्वकं यथाधिकारं च व्याख्यातमस्ति । तथा चैवं भवति तस्य च प्रणवस्य समष्टिस्वरूपत्वे त्वेकाक्षरत्वम्, व्यष्टिस्वरूपत्वे त्र्यक्षरत्वम्। अस्त्यक्षरेषु त्रिषु प्रत्येकमर्थभेदश्च । स यथादर्शनं दृश्यते । परं त्वात्मार्थकोऽकारश्च प्रथमः, उकारश्च संसारवाचको द्वितीयः, निषेधपरो ब्रह्मवाचकश्च मकारस्तृतीयः, इति, एवमकारेण ज्ञानमुकारेण क्रिया मकारेणेच्छा इति, एवं च समाहारोऽपि तुरीयः प्रणववाच्य इति, अकाराद्यक्षरवाच्येभ्यो ह्यतीतं वस्तु तुरीयं च समाहारवाच्यमिति च, प्रबन्धेऽस्मिन्सयुक्तिकप्रमाणै रुपपाद्यते । न च प्रणवे समाहारवाचकस्याक्षरस्यादर्शनान्न तुरीयवस्तुसत्वे प्रमाणमस्तीति वाच्यम्, तदकाराद्यक्षराणां च त्रयाणां समाहारद्वंद्ववृत्तौ समाहारस्यापि समासवाच्यस्य तदक्षरत्रयात्मक-



प्रणवार्थत्वात् । तत एव हि सन्त्येतेऽर्थाश्चत्वारः । तस्मादेव हि भवन्ति संसाराः ज्ञानक्रियेच्छासमाहारा इति शास्त्रस्यास्य सिद्धान्तः । सत्यपि यथादर्शनमर्थभेदे, चतुर्विधो विभागश्च भवति श्रुतिसिद्ध एव । अत एव प्रणवव्याख्यानपरायां च माण्डूक्योपनिषदि प्रणवस्य चतुष्टयप्रकारत्वमुक्तम् । तस्मात्प्रणवस्य चातुर्विध्यं युक्तमेवेत्यस्माकमाशयः ।

प्रबन्धोऽयं हि भवति प्रकरणत्रयात्मकः । तत्र च प्रथमं भवति प्रकृतिसन्धिप्रकरणं तरङ्गपञ्चकात्मकम् । तत्र च क्रमशः स्वशास्त्रार्थसंग्रहार्थप्रतिपादनपूर्वकं तदकारवाच्यात्मस्वरूपमुकारवाच्यानात्मसंसारस्वरूपं मकारवाच्यं तदुभयभिन्नं तदुभयात्मकं तदुभयसंसर्गनिषेधपरं च ब्रह्मस्वरूपं त्रयाणां संधिरूपो योगस्तत्समाहारार्थश्च, सर्वं महर्षिणा व्याख्यातं भवति । अत्रेदमवधेयम्— "एवमेव संसारात्मप्रतिषेधाश्च भवन्ति । यं विना न यस्योपस्थितिः न तयोः पृथग्भावो वक्तुं शक्यः, किन्तु स्वयमेक एव तिष्ठति । संसारस्त्वयमात्माधीनः, तथैवाऽऽत्मा संसाराधीनः । तदेवं निश्चयेन न तयोः पृथग्भावः समुपपद्यते । तयोः संबन्ध एव निषिद्धो भवति" इति प्रथमप्रकरणचतुर्थतरङ्गे महर्षिणोक्तः प्रणवार्थश्च संक्षिप्तः । संहितायां तु तदकारोकारौ भवतश्च परस्परसापेक्षौ । सत्यां हि तदपेक्षायां तयोरेकरूपत्वमायाति ओ इति । अधिकारी च तदोकारे, न तदकारोकारस्वरूपं तदर्थं वा जानाति,

किं त्वोकारं च तदर्थमेव जानाति । यस्य च पुनरकारोकारयोश्च प्रत्येकं हि जिज्ञासास्ति, तद्विज्ञानाय तदकारोकारयोः संबन्धस्य निषेधकं किमपि शास्त्रं वक्तव्यम् । नोचेदात्मानात्मनोश्चैकत्वभ्रमेण, पृथक्त्वेन प्रत्यगात्मविज्ञानं प्रकृतिविज्ञानं च न भवति । एवमो इति चैकत्वभ्रमेणाकारविज्ञानमुकारविज्ञानं च न पृथग्भवति । तथा हि सति प्रत्यक्षप्रमाणवादिनां लोकायतिकादीनां मतमेव सार्वजनीनं भवेत् । तस्मादात्मानात्मसंबन्धनिषेधकार्थकत्वं मकारस्य युक्तमेव इति । मकारस्य निषेधार्थकत्वं च न स्वतो भवति । किं तु संसारदृष्ट्या हि विज्ञायते । आत्मानात्मनोर्योगेनैव भवति संसारस्त्रितयात्मकः । अतो मकारस्यास्तित्वं नास्तित्वं च भवति संसारमूलमेव । सर्वशब्दमूलभूतयोः सर्वार्थवाचकयोरकारोकारयोर्योगे सति चास्योत्पत्तिः परिदृश्यते । अत एव हि सर्वाक्षरमूर्धन्यो भवति मकार, इति विज्ञेयम् । अमुमर्थमवलंब्यैव प्रणवार्थपरं च ‘ अहमेतन्न, इति महावाक्यं मुमुक्षुभोग्यमित्युच्यते हि महर्षिणा । इत्थं हि निषेधप्रकारः—अहमेतच्च न, एतदहं च न, अहं न, एतन्न, इति । ब्रह्मदृष्ट्या निषेध इति तु, नत्रियुक्तन्यायेन किं तदिति प्रश्ने, तदेकमेवेति विज्ञेयम् । आत्मानात्मयोगजस्य संसारस्य त्रितयभावस्तु गुणकृत एव । अतश्च संसारस्य त्रिगुणात्मकत्वं शास्त्रसिद्धम् । न च मकारस्याऽभावपरत्वे भावबोधकत्वं कथं संभवतीति वाच्यम्, शब्दशक्त्या हि मकारस्यार्थ-



द्वयमप्यस्तीति श्रुतिसिद्धत्वात् । “ मितेरपीतेर्वा ” इति माण्डूक्यश्रुतेर्मकारस्य तदुभयार्थकत्वम् । यथा यश्च स्वस्मिन्स्वस्वरूपेण तदात्मानात्मानौ मिनोति, स मः, इति । तथा च मित्यर्थकत्वे तदात्मानात्मयोगजत्रितयात्मकसंसारस्य, तद्योगनिषेधपरब्रह्मस्वरूपपरिमितत्वमस्तीतिभावः । अपीत्यर्थकत्वे तु मिनुतो यस्मिन्नात्मानात्मानौ समः, इति, तद्व्युत्पत्तिः । तथा चात्मानात्मलयश्च मकारार्थे भवतीति विज्ञेयम् । किं च तदात्मानात्मयोगनिषेधपरस्यापि तृतीयस्य च मकारस्य तस्मिन्नेव तुरीयांशे लयः कथितो भवति । अत एव “ यस्मिन्प्रयन्त्यभिसंविशन्ति ” इति तैत्तिरीयश्रुतौ च व्याप्तिर्योगश्च कथितं भवति । किं च मकारस्यास्ति दृष्टिद्वयम् । तत्र प्रथमा च संसारपरा, योगपरा च द्वितीया । तत्क्रमेण मकारस्य त्रितयावस्थावस्थितब्रह्मस्वरूपबोधकत्वम्, योगपरतुरीयवस्तुबोधकत्वं चेति विज्ञेयम् । अत एव “ वस्तुतस्तु न तेषां पृथग्भावसमुपपद्यते । न संसारश्चात्मनो भिन्नस्तिष्ठति । एवमात्मापि न संसाररहितस्तिष्ठति । एवं प्रतिषेधार्थकमकारं विना न चैतद्द्वयोरुपस्थितिर्भवति । अतोऽस्य प्रणवस्य भागत्रयेण कथनं केवलं सर्वबोधायेति मन्तव्यम् । प्राधान्यात्तु केवलमेकाक्षर एव सः । यथा चावयवी तदवयवेभ्यो भिन्नः परिदृश्यते । अत्र चोभयोः सत्ता त्वेकरूपैव भवति, एवमेव हि परं ब्रह्मेति विज्ञेयम् ” इति महर्षिणा त्रितयात्मकसंसारस्य ब्रह्मस्वरूपत्वम्, तुरीयस्यैक-

रूपत्वम्, तद्वाचकप्रणवस्य चैकाक्षरत्वं च प्रतिपादितम्। अत्र-मितिरेव व्याप्तिश्च निषेधपरा, सैवभक्तिरिति विज्ञेयम्। सशक्तिकं चात्मानात्मयोगनिषेधकं ब्रह्म भवति। तदेव हि ब्रह्म चिदचिच्छरीरम्, पशुपाशशरीरम्, तदेव चैकमेवाद्वितीयमिति च शास्त्रान्तरदृष्ट्या त्ववगम्यते।

अथ द्वितीयं च प्रकारयोगप्रकरणम्। योगे च भवंति यावन्तः प्रकाराः, तेषां सर्वेषां च स्वरूपमत्र प्रतिपादितं भवति। प्रकारस्तु त्रितयात्मकसंसरणमेव। तच्चैव भवत्यात्मानात्मविषयकं कार्यम्। यच्चैवं संसरणम्, तदेव ज्ञातव्यमिति सिद्धान्ताच्च सर्वस्मादवगम्यते। अत एव हि "सन्धीयतेऽस्मिन्सन्धिरिति व्युत्पत्या हि सर्वमोङ्कार एवेति विज्ञेयम्। यद्यपि संसारात्मप्रतिषिद्धं पृथगेव व्याख्यातमस्ति, तथापि तथाव्याख्यानं केवलानां तत्तत्स्वरूपविज्ञानार्थमेवेति बोध्यम्। वस्तुतस्तु द्वाभ्यामेव ब्रह्मसंसारशब्दाभ्यां सर्वं विज्ञेयं भवति, संसारनिषिद्धात्मन्यभेददर्शनात्। यच्च 'किंचिदस्ति तस्य संसारशब्दार्थत्वात्। एतत्त्रितयभिन्नं नास्तीति व्याख्यानाद्वा" इति तदुक्तार्थः सर्वोऽपि भवति प्रबन्धकृतोक्तः। तथा च त्रितयात्मकसंसरणाविज्ञानपूर्वकमेव तद्ब्रह्मविज्ञानमिति फलितम्। अत एव संसारस्य स्वरूपेण नित्यत्वं गुरुत्वं चेत्थमुक्तं मुनिना "अत एव सर्वेषां जगद्गुरुः, एष एव च संसारः स्वयमेव गुरुः शिष्यश्च भवतीत्यर्थः। जगदेव गुरुर्थस्य यो हि जगतो



गुरुरिति च समासार्थात्। इदमेवाध्ययनं तपः योगकरणं नियोगकरणं च भवति। अत एव संसारं समधीत्यैवं लभ्यतां स्वर्ग उत्तमः इति स्पष्टं भवति। संसारविज्ञानमेव स्वर्गेतिसाधनमिति तत्फलितार्थः" इति। एतेन संसारस्याऽनित्यत्ववादिनां मतमनभ्युपगतमृषिणा चेति विज्ञायते। वस्तुतः संसारस्याऽनित्यत्वं त्वेकरूपेणानवस्थितत्वमेव। तावता च न सर्वथा तस्याऽनित्यत्वं शङ्कनीयम्। तस्मात्प्रकारविज्ञानं च त्रितयात्मकमनेन भवत्यधिकारिणामिति विज्ञेयम्। यच्चैतत्प्रकरणद्वयमधिकृत्य वक्तव्यं विस्तरेण, तत्सर्वस्य पण्डितप्रकाशकविमर्शप्रबन्धे विशेषतो विचारितत्वेन, न पुनस्तद्विचारे त्वस्माकं प्रवेश उपपद्यते। परन्तु तत्सर्वमप्यस्माभिरभ्युपगतमेव सामोदमित्यवधेयम्।

ततश्च भवति क्रियाप्रकरणं तृतीयम्। सन्त्यत्र चैकोनचत्वारिंशत्तरङ्गाः। साकं हि प्रथमद्वितीयप्रकरणाभ्याम्, तरङ्गनवकेन तेन तृतीयप्रकरणेन च संप्रकाशितोऽस्ति, प्रणववादप्रथमभागः। द्वितीयभागश्चास्य प्रणववादस्य, आरभ्य दशमतरङ्गमाषड्विंशतरङ्गं सुपरिष्कृतः प्रकाशितोऽस्ति। तृतीयप्रकरणे च आदितः षोडशभिस्तरङ्गैः क्रमशश्चैवमर्था ह्युक्ता भवन्ति। तथा हि—प्रथमतरङ्गे च साङ्गोपाङ्गवेदतदध्ययनाध्येतृस्वरूपमध्ययनफलं तद्विज्ञानक्रमश्च, द्वितये च संसाराधिपतीनां लोकानां च क्रमः, तृतीये च महाविष्णोस्त्रिमूर्तीनां सूर्यादिगतेश्च स्वरूपम्, चतुर्थे

च सव्याहृतिश्च गायत्री महावाक्यमित्यादीनां स्वरूपम्, पंचमतरङ्गे च ऋग्वेदस्वरूपम्, षष्ठे च यजुर्वेदस्वरूपम्, सप्तमे च सामवेदस्वरूपम्, अष्टमे त्वथर्वणः स्वरूपम्, नवमे च तस्मिन्वेदानां च चतुर्णां ब्राह्मणस्य तु स्वरूपम्, दशमे चैवं वेदानामुपनिषदां स्वरूपम्, एकादशे च तदुपवेदस्वरूपम्, द्वादशे च वेदानां शुक्लकृष्णशाखास्वरूपम्, त्रयोदशे च वेदाङ्गानि, चतुर्दशे त्वध्ययनक्रमः, पंचदशे च तदुपाङ्गानां स्वरूपम्, षोडशे तरङ्गे च शास्त्राणां च स्वरूपं चेति, सर्वं यथावच्च साङ्गं प्रतिपादितं भवति। एवं षोडशभिश्च तरङ्गैः पुमर्थहेतुधर्मविज्ञानसाधनानि विद्याश्च साङ्गं ह्यभिवर्णिता भवन्ति। ततश्च पंचभिश्च तरङ्गैः परप्रेप्सुमुमुक्षूपास्यं चात्मस्वरूपं ब्रह्म पञ्चविधं चाभिवर्णितं भवति विशेषेण। ततश्च पञ्चभिस्तरङ्गैस्तद्ब्रह्मविज्ञानसाधनं च साङ्गमभिवर्णितं भवति। अत्र वक्तव्यार्थस्य संक्षिप्तस्य प्रणववादार्थदीपिकायां समीचीनमभिवर्णनेन, तावतैव प्रेक्षावतां तत्संक्षिप्तार्थविज्ञानं भवतीत्यस्माकमभिप्राय इत्यलम्।

प्रणवार्थप्रभाववर्णनपराणां च सर्वासां विद्यानां सत्यर्थविचारे हि प्रणववादप्रतिपादिताश्च सर्वेऽप्यर्थाः शास्त्रीया भवन्त्येव। तथाहि—

"प्रणवाद्याः स्मृता मन्त्राश्चतुर्वर्गफलप्रदाः।
तस्माच्च निस्सृताः सर्वे प्रलीयन्ते च तत्र वै॥



माङ्गल्यं पावनं धर्म्यं सर्वकामप्रसाधनम्।
ओङ्कारं परमं ब्रह्म सर्वमन्त्रेषु नायकम्॥

यथा पर्णं पलाशस्य शङ्कुनैकेन धार्यते।
तथा जगदिदं सर्वमोङ्कारेणैव धार्यते॥

सिद्धानां चैव सर्वेषां वेदवेदान्तयोस्तथा।
अन्येषामपि शास्त्राणां निष्ठाऽथोङ्कार उच्यते॥

प्रणवाद्या यतो वेदाः प्रणवे पर्युपस्थिताः।
वाङ्मयं प्रणवः सर्वं तस्मात्प्रणवमभ्यसेत्॥"

इति याज्ञवल्क्येनोक्तम्। अत्र च सर्वेषां वेदानां तदङ्गोपाङ्गानां तथान्येषां च शास्त्राणां सर्वार्थदानां च सर्वमन्त्राणां प्रणवमूलत्वम्, प्रणवस्य च सर्वजगत्कारणब्रह्मस्वरूपत्वम्, चाभिवर्णितं भवति। इदमेव हि सद्विद्वद्विचार्यम्—मुण्डमाण्डूक्याद्युपनिषत्सु च प्रणवार्थपरासु, प्रणवदर्शनात्त्रितयक्रमः चतुष्टयक्रमश्च विज्ञायते। किं तत्त्रितयम्, कश्च वा तच्चतुष्टयक्रमश्चेति विचार्यमाणे तदकारोकारमकाराणां प्रत्येकमप्यर्थभेदश्च दृश्यते। एवं विधेन हि प्रणवेन ज्ञानिभिः कर्मठैः भक्तैर्योगिभिश्च विज्ञेयाश्च सर्वेऽप्यर्था भवन्ति व्याख्याताः। किञ्चैषामधिकारिणां चतुर्णां च प्रत्येकमपि सन्ति बहवो भेदाः, इति। इत्थं हि दृश्यते तेषां त्रयाणां चाक्षराणामर्थभेदः शास्त्रेषु। तथा हि महानिर्वाणतन्त्रे च तृतीयाध्याये—

"अकारेण जगत्पाता संहर्ता स्यादुकारतः ।
मकारेण जगत्स्रष्टा प्रणवार्था उदाहृतः ॥"

इति, अकारोकारमकाराणां क्रमेण विष्णुशिवचतुर्मुखाश्च वाच्या भवन्तीति विज्ञायते । एवं ब्रह्मविद्योपनिषदि तेषामक्षराणां क्रमशः, ब्रह्मविष्णुमहेश्वरवाचकत्वादिकं चेत्थमुक्तं भवति—

"ओमित्येकाक्षरं ब्रह्म यदुक्तं ब्रह्मवादिभिः ।
शरीरं तस्य वक्ष्यामि स्थानं कालत्रयं तथा ॥
तत्र देवास्त्रयः प्रोक्ता लोका वेदास्त्रयोऽग्नयः ।
तिस्रो मात्रार्धमात्रा च त्र्यक्षरस्य शिवस्य तु ॥
ऋग्वेदो गार्हपत्यं च पृथिवी ब्रह्म एव च ।
अकारस्य शरीरं तु व्याख्यातं ब्रह्मवादिभिः ॥
यजुर्वेदोऽन्तरिक्षं च दक्षिणाग्निस्तथैव च ।
विष्णुश्च भगवान्देव उकारः परिकीर्तितः ॥
सामवेदस्तथा द्यौश्चाहवनीयस्तथैव च ।
ईश्वरः परमो देवो मकारः परिकीर्तितः ॥
सूर्यमण्डलमध्येऽथ ह्यकारः शङ्खमध्यगः ।
उकारश्चन्द्रसङ्काशस्तस्य मध्ये व्यवस्थितः ॥
मकारस्त्वग्निसङ्काशो विधूमो विद्युतोपमः ।
तिस्रो मात्रास्तथा ज्ञेयाः सोमसूर्याग्निरूपिणः ॥



शिखा तु दीपसङ्काशा तस्मिन्नुपरि वर्तते ।
अर्द्धमात्रा तथा ज्ञेया प्रणवस्योपरि स्थिता ॥"

इति । अत्र चास्ति तुरीयमपि वस्तु प्रणवार्धमात्रावाच्यमिति विज्ञायते । एवम्—

"ओमित्येकाक्षरं ब्रह्म ध्येयं सर्वं मुमुक्षुभिः ।
पृथिव्यग्निश्च ऋग्वेदो भूरित्येव पितामहः ॥

अकारे तु लयं प्राप्ते प्रथमे प्रणवांशके ।
अन्तरिक्षं यजुर्वायुर्भुवो विष्णुर्जनार्दनः ॥

उकारे तु लयं प्राप्ते द्वितीये प्रणवांशके ।
द्यौः सूर्यः सामवेदश्च स्वरित्येव महेश्वरः ॥

मकारे तु लयं प्राप्ते तृतीये प्रणवांशके ।
अकारः पीतवर्णः स्याद्रजोगुण उदीरितः ॥

उकारः सात्विकः शुक्लो मकारः कृष्णतामसः ।
अष्टाङ्गं च चतुष्पादं त्रिस्थानं पञ्चदैवतम् ॥"

इति, ध्यानबिन्दूपनिषदि तदक्षरार्थाश्च प्रतिपादिताः । तथा च त्रयाणामेषां च वर्णानां नामरूपस्थानव्यापारभोग्यानि चेत्थं माण्डूक्योपनिषदि—"सोऽयमात्माऽध्यक्षरमोङ्कारोऽधिमात्रं पादा मात्रा मात्राश्च पादा अकार उकारमकार इति । जागरितस्थानो वैश्वानरः प्रथमा मात्राऽऽप्तेरादिमत्वादाप्नोति एष वै सर्वान्कामानादिश्च भवति ।

य एवं वेद, स्वप्नस्थानस्तैजस उकारो द्वितीया मात्रोत्कर्षादुभयत्वाद्वोत्कर्षतीह वै ज्ञानसंततिं समानश्च भवति, नास्याऽब्रह्मवित्कुले भवति, य एवं वेद । सुषुप्तस्थानः प्राज्ञो मकारस्तृतीया मात्रा मितेरपीतेर्वा मिनोति ह वा इदं सर्वमपीतिश्च भवति, य एवं वेद । अमात्रश्चतुर्थोऽव्यवहार्यः प्रपञ्चोपशमः शिवोऽद्वैत एवमोङ्कारमात्मैव संविशत्यात्मनाऽऽत्मानं य एवं वेद" इति प्रतिपादितानि सन्ति । अत्रोपनिषद्भाष्यकर्तृभिश्च रामानुजीयैः, वासुदेवप्रद्युम्नसङ्कर्षणाऽनिरुद्धाख्याश्च मूर्तयः प्रणवार्थत्वेनाभिवर्णिता भवन्ति । तथा हि "जागरितस्थानो वैश्वानरोऽकारः प्रथमा मात्रा" इति वाक्यस्य "प्रथममात्रायामकारे जागरितस्थानवैश्वानरशब्दिताऽनिरुद्धदृष्टिः कर्तव्येत्यर्थः" इति व्याख्यातम् । एवं तन्माण्डूक्यप्रथममन्त्रभाष्ये च तैरेव "अकारोकारमकारार्धमात्रात्मकपादचतुष्टयवत्योङ्कारे, अनिरुद्धप्रद्युम्नसंकर्षणवासुदेवापरपर्यायविश्वतैजसप्राज्ञतुरीयाख्यपादचतुष्टययुक्तब्रह्मदृष्टिविधानाय इदं प्रकरणमारभ्यते" इत्यकारादीनामर्थाश्च पूर्वोक्ता निरूपिताः । एवं शङ्करमतावलंबिभिर्विद्वद्भिः,आध्यात्मिकस्याधिदैविकेन सहितस्य प्रपञ्चस्य सर्वस्यैव स्थूलस्य पञ्चीकृतपञ्चमहाभूततत्कार्यात्मकस्याऽनेनात्मना विराजा प्रथमपादत्वम्,तस्यैव सूक्ष्मस्यापञ्चीकृतपञ्चमहाभूततत्कार्यात्मनो हि हिरण्यगर्भात्मना द्वितीयपादत्वम्, तस्यैव कार्यरूपतां त्यक्त्वा कारणरूपतामापन्नस्याऽव्याकृतात्मना तृतीयपादत्वम्, तस्यैव तु कार्यकारणरूपतां विहाय सर्वकल्पनाधिष्ठानतया स्थितस्य सत्यज्ञानानन्तानन्दात्मना चतुर्थपादत्वम्" इति तदकारादिवाच्यं स्वरूपमभिहितम् । एवं सृष्टिस्थितिप्रळयतिरोधानाऽनुग्रहरूपपञ्चकृत्यवन्तो मूर्तयः प्रणववाच्या इति, शैवसमयाचार्याणां राद्धान्तः । तथा हि ब्रह्मसूत्रे चानन्दमयाधिकरणे नीलकण्ठभाष्ये—"मान्त्रवर्णिकमेव गीयते" इति सूत्रव्याख्यानावसरे "ब्रह्म पुच्छं प्रतिष्ठेति ब्रह्मशब्दः प्रणववाचकः" इत्युपक्रम्य, "अस्मान्लोकात्प्रेत्य एतमन्नमयमात्मानमुपसङ्क्रम्येत्यादावन्नमयादीनां प्रत्येकं चेतनवाचकात्मश्रुतिसंबन्धात्संसारलोकादुत्क्रान्तस्य मुक्तस्य क्रमप्राप्यत्वावगमाच्च, एते सर्वथान्नमयादय आत्मनः पंच चेतनान्नाद्यनुमितपञ्चभूताधिष्ठातारः कारणभूताः पुरुषाः ब्रह्मविष्णुरुद्रेश्वरसदाशिवसंज्ञाः, अन्नमयाद्यात्माधारस्य सदाशिवस्यानन्दमयस्यापि कारणं परमशिवाख्यं ब्रह्म तत्प्रतिष्ठेत्युच्यते । तदभेदादानन्दमयस्य ब्रह्मत्वव्यपदेशः" इति तदक्षरार्थः प्रतिपादितः । एषामेव हि पञ्चानां पञ्चब्रह्मोपनिषादा हि सद्योजातवामदेवाऽघोरपुरुषेशानवाच्यत्वं क्रमशः केचिदामनन्ति । ततश्च व्यष्टिभावस्य प्रणवस्य त्रितयक्रमे चतुष्टयक्रमे च तदकारादीनां चार्थाः बहुभिर्बहुधा ह्यभिवर्णिताः सन्तीति विज्ञायते ।



वैष्णवशास्त्रेषु कैश्चिदार्यैरकारस्य नारायणवाचकत्वम्, उकारस्य लक्ष्मीवाचकत्वम्, मकारस्य जीववाचकत्वम्, कैश्चिच्च तदुकारस्यावधारणार्थकत्वं चोक्तमस्ति । मकारवाच्यो जीवश्चाकार-

वाच्यनारायणायैव शेषभूतः, नान्येषामित्युकारस्यावधारणार्थकत्वमभ्युपगच्छद्भिः प्रणवार्थोऽभिवर्णितः । उकारस्य लक्ष्मीवाचकत्वमभ्युपगच्छतां त्वेवं प्रणवार्थः कल्पनीयः—श्रीमतेनारायणाय जीवः शेषभूत इति । एवं श्रीकाशीपुराणे चतुर्दशप्रधानलिङ्गमाहात्म्ये च"—

"अकारं सत्वसंपन्नमृक्क्षेत्रं सृष्टिपालकम् ।
नारायणात्मकं साक्षात्तमःपारे प्रतिष्ठितम् ॥
उकारमथ तस्याग्रे रजोरूपं यजुर्जनिम् ।
विधातारं समस्तस्य स्वाकारमिव चिन्तितम् ॥
मकारं स ददर्शाथ तमोरूपं विशेषतः ।
साम्नां योनिं लये हेतुं साक्षाद्रुद्रस्वरूपिणम् ॥
अथ तत्पुरतो धाता व्याधात्स्वनयनातिथिम् ।
विश्वरूपमथोङ्कारं सगुणं चापि निर्गुणम् ॥
अनाख्यानादसदनं परमानन्दविग्रहम् ।
शब्दब्रह्मेति यत्ख्यातं सर्ववाङ्मयकारणम् ॥
अथोपरिष्टान्नादस्य बिन्दुरूपं परात्परम् ।
कारणं कारणानां च जगतां जनकं परम् ॥
विधिर्विलोकयांचक्रे तपसा गोचरीकृतम् ।
सुसेवितारं पुरुषं प्रणमेद्यं परं पदम् ॥



अतस्तं प्रणवं शान्तं प्रत्यक्षीकृतवान्विधिः ।
त्रयीमयस्तुरीयो यस्तुर्यातीतोऽखिलात्मकः ॥
नादबिन्दुस्वरूपो यः स प्रैक्षि द्विजगामिना ।
प्रावर्तन्ते यतो वेदाः साङ्गाः सर्वस्य योनयः ॥
स वेदादिः पद्मभुवा पुरस्तादवलोकितः ।
वृषभो यस्त्रिधा बद्धो रोरवीति महोदयः ॥
स नेत्रविषयीचक्रे परमं परमेष्ठिना ।
शृङ्गाश्चत्वारि यस्यासन्हस्तासन् सप्त एव च ॥
द्वेशीर्षे च त्रयः पादाः स देवो विधिनेक्षितः ।
यदन्तलीनमखिलं भूतं भाविभवत्पुनः ॥
तद्बीजं बीजरहितं द्रुहिणेन विलोकतम् ।
लीनं मृग्येत यत्रैतदाब्रह्मस्तंभभाजजम् ॥
अतः सभाज्यते सद्भिर्यल्लिङ्गं तद्विलोकितम् ।
पञ्चार्था यत्र भासन्ते पञ्चब्रह्ममयं हि तत् ॥
आदिपञ्चस्वरूपं यत् निरैक्षि ब्रह्मणा हि तत् ।
तमालोक्य ततो वेधा लिङ्गरूपिणमीश्वरम् ॥"

इति, विशेषतश्चाभिवर्णितो भवति तदोङ्कारो ब्रह्मस्वरूपः । अत्र हि प्रणववाच्यस्य परब्रह्मणः स्वरूपपञ्चकं च व्यष्टिप्रणवसमुद्भूतैश्च पञ्चभिरालंबनैः संप्रतिपादितं भवति । इत्थं प्रमाण-

तया चोपपादितानां श्रुतिस्मृतिपुराणादिसिद्धानां च वाक्यानां सत्यर्थविचारे, प्रणववादप्रतिपादितार्थानां तदर्थैः सह समन्वयोऽपि विशेषत कर्तुं शक्यते। यथा—प्रणवावयवाच्च प्रथमादात्मवाचकादकारात्तु सात्विकाश्च जगज्जन्मादयः, विष्णोश्च स्वरूपम्, ज्ञानपरब्रह्मचर्यधर्मः, ऋग्वेदस्वरूपम्, आत्मधर्मश्चेत्यादि सर्वमवगम्यते। अत एवोक्तमृषिणा च प्रबन्धकृता—

"सात्विकानां समुत्पत्तिः संस्थितिस्तद्विनाशनम्।
फलं चावश्यकं तेषामृग्वेदश्च प्रभाषते॥
ऋग्वेदो ज्ञाननिष्ठः स्यादकारान्तर्गतस्तथा।
अहमः प्रतिबोधाय कृतं षोडशमण्डलम्॥
अष्टसु मण्डलेष्वेवं समाहारो व्यवस्थितः।
सार्वत्रिकत्वमूलेन ब्रह्माख्यानं व्यवस्थितम्॥
स्वयं हि विष्णुना दत्तो ऋग्वेदो ज्ञानगोचरः।
अथर्वज्येष्ठपुत्राय ददौ ब्रह्मा सनातनः॥"

इति, प्रणववादतृतीयप्रकरणपञ्चमतरङ्गे। एवं प्रणवावयवाच्च द्वितीयात्संसारवाचकादुकारात्तु, राजसाश्च जगज्जन्मादयः, कार्यब्रह्मस्वरूपम्, कर्मपरश्च गार्हस्थ्यधर्मः, यजुर्वेदस्वरूपम्, संसारकर्मधर्मश्चेत्यादि सर्वमवगम्यते। अत एव च तेन महर्षिणा—"प्रकाराख्यानाच्च क्रियायाश्चात्राभिहितत्वं भवति, यजनं क्रियते



सर्वं यजुरिति तदर्थात्। कारणव्यवहारः, कार्यकारणयोः संबन्धः, कर्तृकरणसंबन्धः, कर्तृकरणयोर्व्यवहारः। कर्तृकरणकार्यप्रयोजनसंबन्धः, अन्यदपि तदावश्यकञ्च सर्वं यजुर्वेदोपन्यस्तं भवति" इति षष्ठतरङ्गे यजुर्वेदवेद्यार्था उक्ताः। एवमेव—

"अहमेतन्नेति वाक्यस्यैतन्मात्रं च यद्भवेत्।
उकारान्तर्गतं तच्च सर्वं प्रोक्तं स्वयंभुवा॥"

इति च तत्रैव। एवं प्रणवावयवाच्च तृतीयान्निषेधवाचकान्मकाराच्च तामसाश्च जगज्जन्मादयः शिवस्वरूपम्, इच्छापरश्च वानप्रस्थधर्मः सामवेदस्वरूपम्, इच्छापरायाश्च शक्तेः स्वरूपं चेत्यादि सर्वं परिबुध्यते। तदुक्तमृषिणा—

"नकारात्मा ह्ययं वेदः सामवेदस्तदिच्छया।
इच्छारूपाद्धि संबन्धादृग्यजूभ्यां तु चान्तिमः॥
तृतीया महती विद्या सामविद्या परायणी।
सर्वनिष्ठा च संबद्धा सर्वरूपानुगामिनी॥"

इति, सप्तमतरङ्गे। एवं समासार्थात्समाहारात्तु तुरीयात्प्रणवान्त्यार्धमात्राच्च—शुद्धाश्च जगज्जन्मादयः, महाविष्णुस्वरूपं समाहारपरश्च सन्यासधर्मः, अथर्ववेदस्वरूपम्, समाहारात्मको योगश्चेत्यादि सर्वं विज्ञातं भवति। तदुक्तमृषिणा—

"ज्ञाननिष्ठो भवेद्विष्णुः क्रियानिष्ठः प्रजापतिः।
इच्छानिष्ठः शिवः साक्षान्महाविष्णुः समाहृतः॥

ज्ञानेच्छे च क्रिया चैव महाविष्णुरितीरितम् ।
ज्ञानं विष्णुरिति प्रोक्तं क्रिया ब्रह्मा सनातनः ॥
इच्छा शिवः समाख्याता सर्वेभ्यो विश्वसंस्थितिः ।"

इति, तृतीयप्रकरणद्वितीयतरङ्गे । अत्र प्रणवाक्षरवाच्यानां च मूर्तीनां स्वरूपं तेषां स्वभावः ; तेषामावश्यकत्वं च प्रतिपादितम् । एवं प्रणवाक्षरवाच्यानां च वेदानां चतुर्णां स्वरूपमित्थम्—

"ऋग्वेदश्च ज्ञाननिष्ठो यजुर्वेदः क्रियापरः ।
इच्छापरः सामवेदः सिद्धान्तोऽथर्वसंज्ञकः ॥
चतुर्णां च समाहारो ब्रह्मसंज्ञा परावरा ।
प्रत्येकं तन्नविज्ञेयं भ्रमदोषयुतान्तरम् ॥"

इति, तृतीयप्रकरणप्रथमतरङ्गे हि महर्षिणोदितम् । इत्थं प्रणवाक्षरवाच्यानां च वेदाधिकारिणां स्वरूपमुक्तं च महर्षिणा—"अथ चतुर्णां ऋग्यजुस्सामाथर्वणां वेदानामधिपतयः महाविष्णुविष्णुशिवब्रह्माणश्च विज्ञेया भवन्ति । महाविष्णोश्च संभूतः समाहारप्रवचनपरोऽथर्वणो वेदः । विष्णोः सकाशाज्ज्ञाननिष्ठश्च ऋग्वेदः । यजुर्वेदः क्रियानिष्ठश्च ब्रह्मणः, शिवाचेच्छानिष्ठः सामवेदः" इति । एवं वेदानां प्रत्येकमाश्रमधर्माश्च प्रणवाक्षरावधेयाः प्रोक्ताश्चैवं महर्षिणा तृतीयप्रकरणे पञ्चमतरङ्गे—

"ज्ञानविद्यां च ऋग्वेदाद्ब्रह्मचर्यादिभावना ।
यजुर्वेदेन गार्हस्थ्यं वानप्रस्थं तु सामतः ॥



संन्यासोऽथर्ववेदेन ब्रह्मतत्वमिदं भवेत् ।"

इति । एवं तदक्षरार्थचतुष्टयपराधिकारिणां मुमुक्षूणां हि प्रत्येकं फलं चेत्थमुक्तं तत्रैव षष्ठतरङ्गे—

"अकारस्मरणेनैव सायुज्यं लभते नरः ।
केवलोकारबोधेन सालोक्यं मुक्तिसंग्रहम् ॥
सारूप्यं च मकारेण संबन्धस्त्रितयात्मकः ।
अनादित्वादनन्तत्वात्सामीप्यं मोक्ष उच्यते ॥"

इति प्रबन्धकृतैव । एवमङ्गानि सोपाङ्गानि, उपवेदाश्चेत्यादि सर्वं सांसारिकजनधर्माधर्मविवेकसाधनं शास्त्रं च प्रणवाक्षरादवधेयमिति श्रुतियुक्तिस्वानुभवैश्च तत्र तत्र निरूपितं भवति महर्षिणा । एवमधिष्ठानादिपञ्चककार्यस्य संसारस्य च त्रितयात्मकस्य ब्रह्मस्वरूपत्वं च तत्र तत्र च सिद्धान्तितमस्ति ।

सर्वान्तर्यामी ब्रह्मस्वरूपश्चात्मैव सर्वैः समुपास्यः, कर्मभक्तिज्ञानयोगाश्च तदुपासनासाधनानि, मुमुक्षुभिश्च तदात्मानात्मशरीरं शुद्धं च ब्रह्म विद्याभिर्विचार्यम्, ब्रह्मसामीप्यमेव परमं प्राप्यं फलमिति च प्रबन्धस्यास्य सिद्धान्तः । तस्मादयं महर्षिविरचितश्च प्रणववादः ब्रह्मविचारपरैर्मुमुक्षुभिर्विचार्य एव भवतीत्यस्माकमाशयः । किञ्च प्रबन्धेऽस्मिन्व्याकरणप्रक्रियाविरुद्धं गूढार्थं च शब्दस्वरूपं विशेषतस्तत्र तत्र च दृश्यते । तच्च शास्त्रान्तरविशेषविज्ञान-

विभवात्कथं चिदपि समीचीनं बोद्धुं शक्यते। सुचिरं चास्य प्रबन्धस्य विचारे महार्था ह्यनेकाश्चावगन्तुं शक्या भवन्तीत्यस्माकमाशयः। प्रणववादार्थदीपिकायां च तदुपहितायाम्, तथा पण्डितप्रकाशकविमर्शे च, प्रणववादप्रबन्धवेद्या ह्यर्थविशेषाः प्रमाणबद्धाश्च व्याख्याता भवन्ति। तत एव ह्येतावता चोपोद्धातेन वक्तव्यं विषयं च परमेश्वरार्पणपूर्वकमब्रूम। तस्मात्प्रबन्धश्चायमाचन्द्रतारं विजयताम्, एतादृशमण्डलप्रबन्धप्रकटनाभिवृद्धिमाकाङ्क्षन्तः सर्वे महाभागाः डाक्टर्—सर्. यस्. सुब्रह्मण्यार्यप्रभृतयः, पण्डितः प्रकाशकश्च श्रेयसा यशसा दीर्घायुष्येण सुखेन चाभिवर्द्धन्तामिति सर्वेश्वरः च सर्वमङ्गळापतिः सर्वपतिः पशुपतिः सविनयं प्राथ्यते।

| | |
|---|---|
| इत्थम्<br>श्रीगोमुक्तिक्षेत्रस्थश्रीकैलासनाथ<br>मठाऽधिपतिः<br>१०—३—१९१९. | अंबलवाणदेशिकः. |

ॐ

# प्रकाशकस्य

## सविनयकार्तज्ञविज्ञापनम्।

आर्या महाभागाः!

प्रकाशकस्यानिभिस्तु तत्तच्छास्त्रार्थदिदृक्षुभ्यः सहृदयेभ्यस्तत्तदधिकारिभ्यश्च प्रबन्धममुं च प्रणववादद्वितीयभागरूपमधिकृत्य सविनयं सप्रमाणं च वक्तव्यो विषयश्च सर्वोऽपि, अस्मच्चोळमण्डलमण्डनायमानगोमुक्तिक्षेत्रविराजमानश्रीकैलासपरंपराधीनसच्छैवसमयप्रतिष्ठापकाचार्यमठसंस्थापिताचार्यपीठं च समधिष्ठितैः सर्वशास्त्राभिज्ञैः श्रीपार्वतीरमणचरणारविन्दानुषक्तमानसैः सन्महापुरुषलक्षणलक्षितैर्यतिवर्यैश्च श्री-ल-श्री अंबलवाणदेशिकैः, सामोदं विरचितेन सरसगंभीरातिललितनिर्लिपवाणीविलासेन सद्विद्वज्जनश्लाघनीयेन च मान्योपोद्धातेन भवति समीचीनं सङ्क्षिप्तं च प्रतिपादितः। तावतैव हि भवति सुदृढतमा प्रवृत्तिश्च सतां सहृदयानां च प्रणववादप्रतिपाद्यविषयजिज्ञासायाम्, यतश्च तस्मिन्महनीयोपोद्धाते हि—तत्तच्छास्त्राणां सद्विद्वत्कार्यपरीक्षायाः प्रकारः, सद्विद्याधिकारिणां स्वरूपम्, अस्ति ब्रह्मेति वदतां च सर्वेषां समयानां तदुपास्येश्वरस्य च परमार्थतः समत्वम्, एतत्प्रबन्ध

प्रतिपाद्यविषयगौरवनिरूपणपूर्वकं तस्य मुमुक्षुजनविचार्यत्वम्, प्रबन्धेऽस्मिंश्च महर्षिभ्याख्यातानां च प्रणवार्थानां श्रुतिस्मृतीतिहासागमपुराणादिसिद्धत्वसमर्थनम्, प्रबन्धस्यास्य यथा विभागं संग्रहार्थनिरूपणं चेत्यादि सर्वं भवति समञ्जसं निरूपितम्। एवं तन्महनीयोपोद्घातरचनायै चानर्घस्वसमयदानेन, प्रणववादद्वितीयभागस्यास्य प्रबन्धस्य मुद्रापणाय पुष्कलद्रव्यदानेन च, शुद्धधर्ममण्डलशास्त्रकप्रटनाभिवृद्धिमाशंसमानेभ्योऽभ्यर्हितगुणगणेभ्यश्च तेभ्यो देशिकेभ्यो वयं सविनयं शाश्वतं च कार्तज्ञं समर्पयामः।

वदान्यवरास्ते महाभागा देशिकास्तु, एतन्मण्डलप्रबन्धानां तत्र विशेषतश्च श्रीगीताभाष्यखण्डरहस्यस्य च मुद्रापणेऽपि द्रव्यं च संपूर्णं संप्रयच्छन्तीत्येतच्च विजानन्तो महाभागाः पण्डिताः केचित्, उत्तमश्लोकानां च तेषां देशिकानां चरितं च प्रबन्धरूपमस्मत्संप्रतीक्षन्ते। तच्चेश्वरकृपया ह्यचिरादेव विरचितं प्रकाशितं च भविष्यतीति मन्यामहे। अद्य हि सप्रोदं तद्देशिकचरितदिदृक्षुभ्यः सविनयमित्थम्—तेषां श्री-ल-श्री अंबलवाणदेशिकानां दिव्यमङ्गळविग्रहचित्रं च पुरस्तादस्य प्रबन्धस्य संप्रतिष्ठापितं भवति, इति सकार्तज्ञं विज्ञापयामः।

इत्थम्,
प्रकाशकः
पण्डित के. टि. श्रीनिवासाचार्यः

शुद्धधर्ममण्डलविद्यानिकेतनम्,
२०—४—१९.

ॐ

# प्रणववादार्थदीपिका ॥

तत्र

## चतुर्थोऽध्यायः ॥

नरनारायणौ देवौ शुद्धसंकल्पनायकौ।
योगदेवीं तथान्यांश्च शुद्धान्सिद्धान्नमाम्यहम् ॥ १ ॥

अथ प्रणववादस्य गार्ग्यायणमहर्षिणा।
भागे चास्मिन्द्वितीये तु योऽर्थः प्रोक्तो विशेषतः ॥ २ ॥

तस्यार्थस्य हि संक्षिप्तां दीपिकां कारिकामहम्।
करोमि बालबोधार्थं सन्तस्तुष्यन्तु निर्मलाः ॥ ३ ॥

क्रियाप्रकरणे त्वस्मिन्तृतीये प्रेप्सुभिः परम्।
प्रकारयोगतत्त्वज्ञैः सर्वमावश्यकं परम् ॥ ४ ॥

इति स्वकर्मनिरतैर्विज्ञेयश्च सनातनः।
योऽर्थस्तस्य स्वरूपन्तु वर्णितं स्यान्महर्षिणा ॥ ५ ॥

सर्वेषां चैव लोकानां पुमर्थानर्थसाधनौ।
धर्माधर्मौ हि वेदेऽस्मिन्साङ्गोपाङ्गं व्यवस्थितौ ॥ ६ ॥

पुरुषैरर्थ्यमानश्च तथा वेदानुशिक्षितः ।
शुद्धाभ्युदयहेतुश्च यः स्याद्धर्मः स उच्यते ॥ ७ ॥

योऽयं धर्मविरुद्धः स्यात्सोऽधर्म इति निश्चयः ।
तयोस्तु लक्षणं चैव शास्त्रेषूक्तमनेकधा ॥ ८ ॥

इति पूर्वतरङ्गेषु नवसु प्रणवार्थदम् ।
साङ्गोपाङ्गस्य वेदस्य तत्कर्तॄणां च लक्षणम् ॥ ९ ॥

वेदमातुश्च गायत्र्यास्तथा लोकाधिकारिणाम् ।
संसाराधिपतीनां च स्वरूपमभिवर्णितम् ॥ १० ॥

दशमेऽस्मिन्तरङ्गेऽत्र गार्ग्यायणमहर्षिणा ।
वर्ण्यते चोपनिषदां स्वरूपं सप्रकारकम् ॥ ११ ॥

सनातनस्य वेदस्य स्वरूपाच्च स्वभावतः ।
भेदस्त्वनन्तो विज्ञेयश्चेति ब्रह्मविदां मतम् ॥ १२ ॥

सामान्यतो हि द्वौ भेदौ कथितौ हि महर्षिभिः ।
मन्त्रश्च ब्राह्मणं चेति तदर्थश्चेत्थमुच्यते ॥ १३ ॥

प्रयोगसमवेतार्थज्ञापको मन्त्र उच्यते ।
तस्माद्भिन्नो वेदभागो ब्राह्मणं चेति निर्णयः ॥ १४ ॥

गार्ग्यायणस्तु भगवान्वेदान्विभजते त्रिधा ।
मन्त्रो ह्युपनिषच्चेति ब्राह्मणं चेति शास्त्रतः ॥ १५ ॥



यथा ह्यवयवी कश्चित्पूर्णोऽस्त्यवयवैस्तथा ।
ब्राह्मणोपनिषन्मन्त्रैः पूर्णो वेदश्च दृश्यते ॥ १६ ॥

ब्राह्मणोपनिषन्मंत्रस्वरूपज्ञानपूर्वकम् ।
यच्च स्याद्वेदविज्ञानं तत्पूर्णमिति कथ्यते ॥ १७ ॥

येन वै स्थूलतत्त्वानि वर्ण्यन्ते च यथाक्रमम् ।
यथारूपं च वेदेषु तद्ब्राह्मणमितीरितम् ॥ १८ ॥

इत्थं तत्त्वस्वरूपं हि विज्ञेयं पण्डितोत्तमैः ।
कारणं सत्परं नित्यं वस्तु तच्चेति कथ्यते ॥ १९ ॥

तस्य भावस्तु तत्त्वं स्यादिति तत्त्वविदां मतम् ।
मतभेदेन तत्त्वानां संख्या चास्ति सुनिश्चिता ॥ २० ॥

चतुर्विंशतितत्त्वानि प्राकृतानीति निर्णयः ।
अहमेकं परं तत्त्वमितरत्प्राकृतं विदुः ॥ २१ ॥

स्थूलं सूक्ष्ममिति द्वौ हि भेदौ प्राकृततत्त्वगौ ।
प्राकृतानां हि तत्त्वानां सृष्टिः शास्त्रेषु वर्णिता ॥ २२ ॥

इमानि स्थूलतत्त्वानि सर्वकार्यक्षमाणि च ।
महद्बुद्धिस्तथाकाशो वायुस्तेजस्तथा पराः ॥ २३ ॥

आपः पृथ्वीति चोक्तानि गार्ग्यायणमहर्षिणा ।
एवमेव हि सूक्ष्माणि तत्त्वानि कथितानि हि ॥ २४ ॥

प्रत्येकं चैव तत्त्वानां ह्यणवः परमाणवः ।
युक्ताश्चेश्वरसङ्कल्पात्सन्त्यन्योन्यं स्वभावतः ॥ २५ ॥

अणूनां चैव योगात्तु सृष्टिर्नानाविधा भवेत् ।
तत्त्वेषु तादृशैस्तत्त्वैः सृष्टिः पञ्चीकृता मता ॥ २६ ॥

स्थूलसूक्ष्मस्वरूपा तु सृष्टिः सर्वापि चाणुषु ।
जायते क्रमशस्तस्माज्जगत्सर्वं विवर्धते ॥ २७ ॥

ज्ञानमिच्छाक्रिया चैव समाहारस्तथा परः ।
एतैश्चतुर्भिर्भेदैश्च परमाणुश्चतुर्विधः ॥ २८ ॥

कर्ता संसारकार्यस्य परमाणुर्भवेदतः ।
नास्त्यस्य जगतः सृष्टिर्विना च परमाणुभिः ॥ २९ ॥

तैरेवस्थूलतत्त्वानां परिपुष्टिस्तु जायते ।
ततः सर्वजगद्बीजं परमाणुरितीर्यते ॥ ३० ॥

अतश्च परमाणूनां सृष्टिः सन्निहिता च या ।
सैव चोपनिषद्भिश्च यथातत्त्वं हि वर्ण्यते ॥ ३१ ॥

प्रत्येकं परमाणूनां स्वरूपं कार्यमेव च ।
सामानाधिकरण्यं च तद्विरोधश्च सर्वशः ॥ ३२ ॥

सर्वं प्रयोजनं चैव संबन्धश्च परोदयः ।
सर्वं ह्युपनिषद्भिश्च वर्णितं स्याद्यथाविधि ॥ ३३ ॥



चतुर्णामपि वेदानां प्रत्येकं च यथाक्रमम् ।
भवन्ति चोपनिषदश्चतस्र इति निर्णयः ॥ ३४ ॥

तस्मादेवोपनिषदः प्रोक्ताः सन्त्यत्र षोडश ।
अष्टोत्तरशतं चैव सार्धद्विशतमेव च ॥ ३५ ॥

यच्चास्त्यत्रोपनिषदां तच्च सर्वं स्वभावतः ।
षोडशोपनिषद्भाष्यरूपमेवेति निश्चितम् ॥ ३६ ॥

एवं ब्राह्मणभागार्थो विज्ञेयः स्यान्मनीषिभिः ।
स्वरूपं स्थूलतत्त्वानां ब्राह्मणैरभिवर्णितम् ॥ ३७ ॥

प्रत्येकं च तथा तेषां स्वरूपं च चतुर्विधम् ।
यथा हि चोपनिषदां भेदाः षोडश वर्णिताः ॥ ३८ ॥

प्रतिवेदं ब्राह्मणानां तथा भेदाश्च कीर्तिताः ।
यथा ह्युपनिषद्भिश्च वर्णिताः परमाणवः ॥ ३९ ॥

ब्राह्मणैः स्थूलतत्त्वानि वर्णितानि तथात्र हि ।
ब्राह्मणानि च सर्वाणि कर्मार्थानीति निश्चयः ॥ ४० ॥

तृतीयो मन्त्रभागार्थश्चेत्थमन्त्रविचारतः ।
सर्वेषां निश्चयो येन येन सर्वं सुरक्षितम् ॥ ४१ ॥

शब्दक्रमसमायुक्तस्तदनुष्ठानलक्षितः ।
भाति यः शब्दशक्त्या च स मन्त्र इति कथ्यते ॥ ४२ ॥

मन्त्रवाच्या ब्रह्मशक्तिर्मकारार्था परायणी ।
तस्याः संसारकार्यं च सर्वं समभिजायते ॥ ४३ ॥

ब्राह्मणस्योपनिषदः समाना च भवेदिह ।
श्रुतिरित्येव संज्ञा च श्रुतेर्व्याख्यानतो भवेत् ॥ ४४ ॥

वेदमात्रस्य संज्ञा तु मन्त्र इत्युच्यतेऽत्र हि ।
स मन्त्रश्च श्रुतिश्चैव ह्येवं भेदेन बुध्यते ॥ ४५ ॥

संसारेऽस्मिंश्च सर्वत्र वृद्धिरेव सनातनी ।
क्षयस्त्वत्र हि नास्तीति सयुक्तिकमुदाहृतम् ॥ ४६ ॥

तस्माच्चोपनिषद्विद्या विज्ञेयास्ति मुमुक्षुभिः ।
एवं चोपनिषद्विद्या वर्णितात्र महर्षिणा ॥ ४७ ॥

अथात्रैकादशे चास्मिन्तरङ्गे तु महर्षिणा ।
उपवेदस्वरूपार्थः सरहस्यं विचारितः ॥ ४८ ॥

त्रयाणां ब्राह्मणादीनां समाहारार्थकश्च यः ।
उपवेदः स विज्ञेयश्चेति गार्ग्यायणोऽब्रवीत् ॥ ४९ ॥

वेदोपनिषदोश्चैव ब्राह्मणस्यापि सर्वथा ।
प्रत्येकमुपवेदश्च भवेदेकः सनातनः ॥ ५० ॥

प्रत्येकं परमाणूनां स्वरूपं कार्यमेव च ।
सर्वं ह्युपनिषद्भिश्च तद्व्याख्यातं यथाविधि ॥ ५१ ॥



तथा तेषां सहान्यैश्च यथांशं च यथाविधि ।
यथाकालं यथादेशं यथावस्थं यथाक्रमम् ॥ ५२ ॥

यथारूपं यथाशक्ति यथाकर्म यथावपुः ।
तथा यथावश्यकं च यथाकार्यं विशेषतः ॥ ५३ ॥

समाहारः समायोगो ह्युपवेदेन वर्णितः ।
समायोगप्रकारस्तु विज्ञेयश्चेत्थमत्र हि ॥ ५४ ॥

प्रत्येकमपि लोकानां कश्चित्कर्ता परः पुमान् ।
अस्तितेनैव संसारव्यवसायश्च कल्प्यते ॥ ५५ ॥

तत्तत्सूत्रगतैर्जीवैः संसारव्यवसायिभिः ।
सृष्टिचक्रं समापन्नैस्तदीशाज्ञा प्रतीक्ष्यते ॥ ५६ ॥

यत्र यस्य यादृशं च ज्ञानाद्यावश्यकं भवेत् ।
तादृशान्परमाणूंश्च तत्र तस्य विशेषतः ॥ ५७ ॥

नियोजयति चेशोऽपि यथाप्राक्कर्मसंस्थिति ।
परमाणुप्रयोगोऽयमुपवेदानुशिक्षितः ॥ ५८ ॥

किञ्चात्र परमाणूनां कर्म योगस्य साधनम् ।
त्रिविधं चेति तत्प्रोक्तमिदमित्थं निरूपितम् ॥ ५९ ॥

ज्ञानं च ज्ञानसामर्थ्यं येन सार्वत्रिकेण च ।
तत्प्रयोजनसामर्थ्यं कमर्णा च समाहृतम् ॥ ६० ॥

तत्कर्म प्रथमं ज्ञेयं द्वितीयं त्वेवमुच्यते ।
यस्मिन्कर्मचिकीर्षास्ति न तच्छक्तिश्च तादृशी ॥ ६१ ॥

तत्प्रयोजनसामर्थ्यं नैव तत्कर्म तादृशम् ।
तृतीयं कर्म चैतत्स्याच्चिकीर्षा यत्र नैव हि ॥ ६२ ॥

सामर्थ्यमात्रमस्त्येव तदित्थं कर्म भावितम् ।
पूर्वजं च यथा कर्म नियतं यच्च यस्य हि ॥ ६३ ॥

तथा तस्येह भवति कर्म सर्वं च दैहिकम् ।
सर्वं तदनुरूपं च स्वरूपमभिजायते ॥ ६४ ॥

एवं चतुर्विधा सृष्टिः ह्युपवेदनिरूपिता ।
चतुर्णामुपवेदानां चार्चितत्वमिहोच्यते ॥ ६५ ॥

आवश्यकेन रचितः स्यान्महाविष्णुना च यः ।
वेदः सोऽयमार्चितः स्यादित्यत्र हि निरूपितम् ॥ ६६ ॥

ज्ञानादीनां क्रमोऽप्यत्र सुस्पष्टं नोपलभ्यते ।
अतः समाहाररूपो ह्युपवेदश्च बुध्यते ॥ ६७ ॥

तस्मादेवोपवेदानां चतुर्णामपि च श्रुतम् ।
ओमित्येवेति तत्सन्धिस्वरूपत्वमुदाहृतम् ॥ ६८ ॥

एवं तन्त्रस्वरूपत्वमुपवेदस्य कथ्यते ।
तन्त्रयत्यखिलं स्वस्मिन्यच्च तत्तन्त्रमुच्यते ॥ ६९ ॥



समाहारस्तु तन्त्रार्थस्तेन सर्वं समाहृतम् ।
भवेदिति च विज्ञेयमतोऽत्र च निरूपितम् ॥ ७० ॥

संपूर्णं विस्तृतं चैव वस्तुमात्रं समाहृतम् ।
एवं च वेदोपनिषद्ब्राह्मणानि तथापरम् ॥ ७१ ॥

उपवेदं च विज्ञाय ब्रह्मलोके महीयते ।
ब्रह्मभावं च संप्राप्य निश्चलश्च निरामयः ॥ ७२ ॥

सर्वातीतस्वभावेन सच्चिदानन्दमच्युतम् ।
स्वात्मानं पुरुषं ज्ञात्वा ब्रह्मानन्दी भविष्यति ॥ ७३ ॥

इत्येवमुपवेदार्थः संग्रहेण प्रकाशितः ।
तत्वजिज्ञासुभिश्चायमध्येय इति निर्णयः ॥ ७४ ॥

द्वादशेऽस्मिन्तरङ्गे तु गार्ग्यायणमहर्षिणा ।
सर्वेषां चैव वेदानां शाखाभेदो निरूप्यते ॥ ७५ ॥

कृष्णः शुक्लश्चेति भेदौ प्रतिवेदं व्यवस्थितौ ।
तमसो वाचकः कृष्णः प्रकाशस्य च वाचकः ॥ ७६ ॥

शुक्लश्चेति हि विज्ञेयं शाखाभेदाविमौ मतौ ।
स्यादकारपरः शुक्लः कृष्णश्चोकारभावितः ॥ ७७ ॥

आभ्यां भिन्नमतीतं स्यादवाच्यं शुद्धसंज्ञकम् ।
तदिदं सर्वसंसारे भासते नियमद्वयम् ॥ ७८ ॥

ततस्तमःप्रकाशाख्यमिदं प्रणवभावितम् ।
तदृग्वेदादिकं चेति विज्ञेयं स्यान्मनीषिभिः ॥ ७९ ॥

ततः स्यात्कृष्णऋग्वेदः शुक्लऋग्वेद इत्यपि ।
एवं हि यजुषः साम्नस्ततश्चाथर्वणस्तथा ॥ ८० ॥

मन्त्रब्राह्मणयोश्चापि तथोपनिषदामपि ।
उपवेदस्य च प्रोक्तौ कृष्णशाखा तथाऽपरा ॥ ८१ ॥

शुक्लशाखेति च द्वौ हि भेदौ प्रणवसंभवौ ।
एवं स्तः परमाणूनां तत्त्वानां चैव तावुभौ ॥ ८२ ॥

शाखयोरनयोश्चैव व्याख्यातश्च यथाक्रमम् ।
संयोगश्च वियोगश्च ह्यणूनां च विशेषतः ॥ ८३ ॥

तमःप्रकाशयोरत्र ह्यंशेनापि यथाक्रमम् ।
दौर्बल्यं च क्रियाबद्धं प्राबल्यं ज्ञानसंवृतम् ॥ ८४ ॥

उक्तमस्ति विशेषेण चैवं सर्वेषु विद्यते ।
वेदेषु तद्द्वयं चैव सर्वत्र परिदृश्यते ॥ ८५ ॥

एवं च कृष्णशुक्लाख्यशाखानां च महर्षिणा ।
सर्वनिर्णायकत्वाच्च यन्त्रसंज्ञा प्रकीर्तिता ॥ ८६ ॥

वेदोपाख्यानरूपत्वाच्छाखेति परिकल्प्यते ।
सर्वेषां निर्णयश्चैव शाखाभिः परिबुध्यते ॥ ८७ ॥



कर्तारश्चैव शाखानां विष्णुब्रह्मशिवा मताः ।
महाविष्णुनियाम्याश्च ताभ्यश्चापि यथायथम् ॥ ८८ ॥

संसारकल्पनाः सर्वाः प्रबुध्यन्ते यथाक्रमम् ।
सर्वं शाखापरं ज्ञेयं संसारे यच्च भासते ॥ ८९ ॥

ततस्त्रयोदशे चास्मिन्तरङ्गे तु महर्षिणा ।
वेदाङ्गानां स्वरूपं च व्याख्यातं प्रणवेक्षणात् ॥ ९० ॥

एवं च वेदोपनिषद्ब्राह्मणानि तथा पुनः ।
उपवेदस्तुरीयश्च शाखे द्वे कृष्णशुक्लगे ॥ ९१ ॥

षट्कमेतच्च सर्वत्र ज्ञानाद्यात्मेति निर्णयः ।
सप्तमश्च समूहः स्यात्समाहारात्मको भवेत् ॥ ९२ ॥

सर्वमेतन्महावाक्यपरं प्रणवभाषितम् ।
तस्माक्षट्कं समध्येयमिति पूर्वं निरूपितम् ॥ ९३ ॥

वेदादीनां च षण्णां तु विज्ञानं येन जायते ।
वेदाङ्गं तदिति ज्ञेयं तच्चैवं षड्विधं भवेत् ॥ ९४ ॥

विनाङ्गं चाङ्गिनो बोधो यतो नैव हि जायते ।
ततश्चाध्ययनं साङ्गं वेदस्य हि विधीयते ॥ ९५ ॥

संसारब्रह्मबोधश्च पूर्णो वेदान्न जायते ।
षडङ्गाध्ययनादेव पूर्णो बोधः स जायते ॥ ९६ ॥

ततस्तमःप्रकाशाख्यमिदं प्रणवभावितम् ।
तदृग्वेदादिकं चेति विज्ञेयं स्यान्मनीषिभिः ॥ ७९ ॥

ततः स्यात्कृष्णऋग्वेदः शुक्लऋग्वेद इत्यपि ।
एवं हि यजुषः साम्नस्ततश्चाथर्वणस्तथा ॥ ८० ॥

मन्त्रब्राह्मणयोश्चापि तथोपनिषदामपि ।
उपवेदस्य च प्रोक्तौ कृष्णशाखा तथाऽपरा ॥ ८१ ॥

शुक्लशाखेति च द्वौ हि भेदौ प्रणवसंभवौ ।
एवं स्तः परमाणूनां तत्त्वानां चैव तावुभौ ॥ ८२ ॥

शाखयोरनयोश्चैव व्याख्यातश्च यथाक्रमम् ।
संयोगश्च वियोगश्च ह्यणूनां च विशेषतः ॥ ८३ ॥

तमःप्रकाशयोरत्र ह्यंशेनापि यथाक्रमम् ।
दौर्बल्यं च क्रियाबद्धं प्राबल्यं ज्ञानसंवृतम् ॥ ८४ ॥

उक्तमस्ति विशेषेण चैवं सर्वेषु विद्यते ।
वेदेषु तद्द्वयं चैव सर्वत्र परिदृश्यते ॥ ८५ ॥

एवं च कृष्णशुक्लाख्यशाखानां च महर्षिणा ।
सर्वनिर्णायकत्वाच्च यत्रसंज्ञा प्रकीर्तिता ॥ ८६ ॥

वेदोपाख्यानरूपत्वाच्छाखेति परिकल्प्यते ।
सर्वेषां निर्णयश्चैव शाखाभिः परिबुध्यते ॥ ८७ ॥



कर्तारश्चैव शाखानां विष्णुब्रह्मशिवा मताः ।
महाविष्णुनियाभ्याश्च ताभ्यश्चापि यथायथम् ॥ ८८ ॥

संसारकल्पनाः सर्वाः प्रबुध्यन्ते यथाक्रमम् ।
सर्वं शाखापरं ज्ञेयं संसारे यच्च भासते ॥ ८९ ॥

ततस्त्रयोदशे चास्मिन्तरङ्गे तु महर्षिणा ।
वेदाङ्गानां स्वरूपं च व्याख्यातं प्रणवेक्षणात् ॥ ९०॥

एवं च वेदोपनिषद्ब्राह्मणानि तथा पुनः ।
उपवेदस्तुरीयश्च शाखे द्वे कृष्णशुक्लगे ॥ ९१ ॥

षट्कमेतच्च सर्वत्र ज्ञानाद्यात्मेति निर्णयः ।
सप्तमश्च समूहः स्यात्समाहारात्मको भवेत् ॥ ९२ ॥

सर्वमेतन्महावाक्यपरं प्रणवभाषितम् ।
तस्माक्षट्कं समध्येयमिति पूर्वं निरूपितम् ॥ ९३ ॥

वेदादीनां च षण्णां तु विज्ञानं येन जायते ।
वेदाङ्गं तदिति ज्ञेयं तच्चैवं षड्विधं भवेत् ॥ ९४ ॥

विनाङ्गं चाङ्गिनो बोधो यतो नैव हि जायते ।
ततश्चाध्ययनं साङ्गं वेदस्य हि विधीयते ॥ ९५ ॥

संसारब्रह्मबोधश्च पूर्णो वेदान्न जायते ।
षडङ्गाध्ययनादेव पूर्णो बोधः स जायते ॥ ९६ ॥

समूहकरणं चैव शब्दानां च यतो भवेत् ।
यतस्तेषां विवरणं व्यवहारमतिस्तथा ॥ ९७ ॥

शब्दोत्पत्तिक्रमश्चैव तदुत्पादनकर्म च ।
शब्दावश्यकता चैव तत्प्रयोगस्य संस्थितिः ॥ ९८ ॥

सर्वमेतच्च विज्ञातं यतः स्यात्सप्रकारकम् ।
ततश्चैव षडङ्गानां मुख्यं व्याकरणं भवेत् ॥ ९९ ॥

व्याक्रियन्ते येन सर्वं तच्च व्याकरणं भवेत् ।
इति व्याकरणार्थश्च मुनिना प्रतिपादितः ॥ १०० ॥

किं च व्याकरणाङ्गस्य चैवं मुख्यत्वमुच्यते ।
भाषातत्त्वात्मकं यच्च तद्धि व्याकरणं भवेत् ॥ १०१ ॥

तदेवमुख्यमङ्गानां शब्दार्थप्रतिपादकम् ।
संसारेऽस्मिंश्च सर्वेषां व्यवसायः परोदयः ॥ १०२ ॥

तत्तल्लोकेष्टया चैव भाषयैवावगम्यते ।
इच्छा प्रज्ञापनार्था या सा भाषेति निगद्यते ॥ १०३ ॥

यच्च भाषावश्यकं च भाषाक्रमनियामकम् ।
तच्च व्याकरणं प्रोक्तं मुख्यं चेति विशेषतः ॥ १०४ ॥

अत्र वस्तुत्रयं चेत्थं वर्ण्यते हि महर्षिणा ।
प्रज्ञापनं व्याकरणं भाषा चेति तदुच्यते ॥ १०५ ॥



प्रज्ञापनं ह्यात्मनिष्ठमकारपरमेव च ।
ततो व्याकरणं प्रोक्तमुकारपरमेव तत् ॥ १०६ ॥

अनात्मसंज्ञकं च स्यात्तयोः संबन्धरूपिणी ।
भाषा चापि मकारस्था त्रयं प्रणवसंस्थितम् ॥ १०७ ॥

ततो व्याकरणादेव शब्दार्थश्चावगम्यते ।
शब्दाः सर्वेऽपि भाषाः स्युः शब्दो वर्णात्मको भवेत् ॥१०८॥

यथाक्रमं च वर्णानां शब्दो योगेन जायते ।
तस्माच्च शब्दविज्ञानं मुख्यं साधनमिष्यते ॥ १०९ ॥

सुशब्दानां प्रयोगेण प्रशस्तो धर्म उच्यते ।
तस्माद्व्याकरणं मुख्यमङ्गं चेति निरूपितम् ॥ ११० ॥

एवमेव हि भाषाया द्वैविध्यं चात्र वर्णितम् ।
एका हि संस्कृता भाषा चान्या प्रोक्ता ह्यसंस्कृता ॥ १११ ॥

पुनः संस्कृतभाषायास्त्रैविध्यं चेत्थमुच्यते ।
वैदिकी लौकिकी चैव ततो ध्वनिपरेति च ॥ ११२ ॥

प्रथमा वैदिकी प्रोक्ता ज्ञाननिष्ठा ह्यकारगा ।
द्वितीया लौकिकी प्रोक्ता कर्मनिष्ठा ह्युकारगा ॥ ११३ ॥

ध्वनिश्चाव्यक्तरूपा च मकारस्था निषिद्धजा ।
इच्छापरा चेति सर्वं प्रणवात्समुदीरितम् ॥ ११४ ॥

ऐक्यं च वैदिकी विद्या लौकिकी भेदमेव च ।
वक्ति ध्वनिपरा चैव निषेधं च परावरम् ॥ ११५ ॥

एवमेव हि शब्दस्य द्वैविध्यमिह कथ्यते ।
वर्णात्मकोऽर्थवचनः शब्दः प्राथमिकोऽभवत् ॥ ११६ ॥

ध्वन्यात्मको द्वितीयः स्यादव्यक्तश्च परिस्फुटः ।
आभ्यां परस्तृतीयश्च मूकत्वपर उच्यते ॥ ११७ ॥

मौनत्वेनापि तस्यैव वचनं श्रुतिसंमतम् ।
सर्वं ब्रह्मपरं विद्यात्प्रणवस्थं मुमुक्षुभिः ॥ ११८ ॥

शब्दप्रकाशिका शक्तिर्यत्र नोपस्थिता भवेत् ।
शब्दानां तत्र मूकत्वं मौनं तदिति चोच्यते ॥ ११९ ॥

एवंविधाः सुशब्दाश्च प्रयुज्यन्ते महर्षिभिः ।
साधुशब्दप्रयोगेण दिव्यः स्वर्गश्च जायते ॥ १२० ॥

एषां त्रयाणां शब्दानां परिवर्तनतस्तथा ।
तन्निवर्तनतश्चैव सप्त भाषास्त्विमा मताः ॥ १२१ ॥

आद्या सांप्रतिका प्रोक्ता महानिर्वाणतत्परा ।
द्वितीया परनिर्वाणपरा स्याच्चाक्षुषी मता ॥ १२२ ॥

तृतीया सा तु निर्वाणपरा सांवर्त्तिका भवेत् ।
चतुर्थी च परा प्रोक्ता तुर्यावस्था समन्विता ॥ १२३ ॥



पश्यन्ती पञ्चमी प्रोक्ता सुषुप्त्यावस्थया युता ।
स्यान्मध्यमा स्वप्नपरा षष्ठी चेयं निगद्यते ॥ १२४ ॥

जाग्रत्परा सप्तमी स्याद्वैखरी चेति निर्णयः ।
सप्त सप्त क्रमाश्चैवं तासां प्रत्येकमीरिताः ॥ १२५ ॥

निर्वाणाद्यास्तथावस्थास्तिस्रश्चासां भवन्ति च ।
एवं चतस्रोऽवस्थाश्च संप्रसिद्धा भवन्ति च ॥ १२६ ॥

जाग्रत्स्वप्नसुषुप्त्यश्च तुरीया चेति ता मताः ।
चतसृष्वप्यवस्थासु नियताश्च यथाक्रमम् ॥ १२७ ॥

वैखर्याद्याश्चतस्रश्च भाषाः स्युः शास्त्रसंमताः ।
तदुच्चारणकाले तु कार्यं सर्वं च तादृशम् ॥ १२८ ॥

शरीरेऽस्मिंश्च भवति नियमेन क्रमेण च ।
यथायोग्यं च तत्पश्चात्प्रथमादिक्रमेण हि ॥ १२९ ॥

सप्तम्यां चैव वैखर्यां प्राप्नोतीतीह बुध्यते ।
तदैवोच्चारणं स्याच्च शब्दानामिति निर्णयः ॥ १३० ॥

शेषाश्चेत्थं संभवन्ति भाषाश्चानेकविक्रमाः ।
अतः संसारभाषा च देशभाषा प्रतिष्ठिता ॥ १३१ ॥

लोकभाषा जगद्भाषा विश्वभाषा परावरा ।
ततो ब्रह्माण्डभाषा चेत्येवं नानाविधा मताः ॥ १३२ ॥

इच्छाप्रज्ञापनत्वेन तासामैक्यमिहोच्यते ।
तद्भाषाव्यवहारो हि शब्दानामेव कथ्यते ॥ १३३ ॥

एकयैव हि गव्यूत्या भेदस्तत्वस्य दृश्यते ।
यथा तथा च भाषाया भेदश्चास्ति सनातनः ॥ १३४ ॥

सा हितत्वानुरोधेन सृष्टिः सर्वाऽपि जायते ।
तथैव योनिनियमोप्यस्ति तत्त्वपरस्तथा ॥ १३५ ॥

यथातत्त्वं यथायोनि देशोऽपि नियतो भवेत् ।
एवं यथायोनितत्त्वं भाषाश्च नियता मताः ॥ १३६ ॥

ततो हि प्रेतभाषा च यक्षगंधर्वरक्षसाम् ।
पिशाचस्य च भाषाः स्युरिति वेद्यं मनीषिभिः ॥ १३७ ॥

तस्माद्व्याकरणं मुख्यमङ्गं चेति निगद्यते ।
अध्यापनं चाध्ययनं तस्य पुण्यप्रदं भवेत् ॥ १३८ ॥

वेदव्याकरणं शास्त्रं सिद्धं माहेश्वरं भवेत् ।
इच्छाप्रज्ञापकत्वेन शब्दशास्त्रस्य सर्वशः ॥ १३९ ॥

शिवस्येच्छापरत्वाच्च शिवोपज्ञमिदं भवेत् ।
महावेदस्य च प्रोक्तं यच्च व्याकरणं भवेत् ॥ १४० ॥

तद्वै महाविष्णुनेति विज्ञेयं स्यान्मुमुक्षुभिः ।
ग्रन्थानां च चतुष्षष्टिकोटिर्व्याकरणस्य हि ॥ १४१ ॥



महाविष्णुप्रणीतस्य महावेदानुसारिणः ।
एवं माहेश्वरं चास्ति वेदव्याकरणं पुनः ॥ १४२ ॥

वर्णार्णवश्चतुष्षष्टिलक्षग्रन्थात्मकस्ततः ।
समानकालिकं प्रोक्तं वेदो व्याकरणं च तत् ॥ १४३ ॥

वर्ण्यते ब्रह्मणो रूपमात्मानात्मकमेव यैः ।
ते च वर्णाः समाख्याता ह्याम्नायाख्या भवन्ति ते ॥१४४॥

स्वरव्यञ्जनरूपेण भेदौ द्वौ तत्र कीर्तितौ ।
त्रयस्त्रिंशत्संख्यया च व्यञ्जनाख्यः स भासते ॥ १४५ ॥

नव च स्वरवर्णाः स्युर्विज्ञेयं चेत्थमत्र हि ।
अकारेकारोकाराश्च त्रयस्ते ब्रह्मसंज्ञकाः ॥ १४६ ॥

अकारादुच्यते चात्मा संसारोऽयमुकारतः ।
द्वयोरावश्यकी शक्तिरिकाराच्च हि बुध्यते ॥ १४७ ॥

एतैर्वर्णैस्त्रिभिश्चैव स्वराः सर्वे भवन्ति च ।
तत्र चैवं त्रिधा भेदो यथायोग्यं व्यवस्थितः ॥ १४८ ॥

ह्रस्वो दीर्घं प्लुतश्चेति तेषां तत्त्वमिदं भवेत् ।
ह्रस्वः स्याज्ज्ञाननिष्ठश्च दीर्घं चैव क्रियापरम् ॥ १४९ ॥

प्लुतो निषेधपर इत्यतो ब्रह्म त्रयं भवेत् ।
प्रत्येकमेषां भेदाश्च त्रयः सन्ति च पूर्ववत् ॥ १५० ॥

उदात्तो ह्यनुदात्तश्च स्वरितश्चेति ते मताः ।
एवं प्रयत्नभेदोऽपि त्रितयात्मक उच्यते ॥ १५१ ॥

किं चात्र सर्ववर्णानां सन्धित्रयमुदाहृतम् ।
स्थानप्रयत्नसाम्याच्च तदावश्यकलक्षितम् ॥ १५२ ॥

एवं प्रकृतिभावश्च विद्यते तत्त्वलक्षणः ।
यथा प्रकृतिभावेन सन्धिभावेन लक्ष्यते ॥ १५३ ॥

शब्दस्तथा ह्युभाभ्यां च भावाभ्यां ब्रह्म लक्ष्यते ।
ततो भावद्वयाभ्यां च ब्रह्म सर्वं जगद्भवेत् ॥ १५४ ॥

धातुश्च प्रातिपदिकमेवमत्र प्रकीर्तितम् ।
आत्मा स्यात्प्रातिपदिकं संसारो धातुरुच्यते ॥ १५५ ॥

भवेदिच्छाकारकं च समाहारः समासगः ।
तिङन्ता धातवः सर्वे क्रियासंसारसंज्ञकाः ॥ १५६ ॥

सुबन्ता ज्ञाननिष्ठाः स्युः सर्वं तत्त्रिविधं भवेत् ।
ओमित्यन्तर्गतं चेति बोधश्चात्रेत्थमुच्यते ॥ १५७ ॥

अन्वयः पदस्य बोधः स्यात्पदार्थस्य ततः परम् ।
वाक्यबोधस्तृतीयः स्याद्वाक्यार्थस्य ततो भवेत् ॥ १५८ ॥

बोधश्चेति ततो बोधाश्चत्वारः परिकीर्तिताः ।
प्रथमो ज्ञाननिष्ठः स्याद्द्वितीयश्च क्रियापरः ॥ १५९ ॥



इच्छानिष्ठस्तृतीयः स्यात्समाहारपरोऽपरः ।
इति बोधस्य भावोऽत्र विज्ञेयः स्यान्मनीषिभिः ॥ १६० ॥

वेदस्य च स्तुतीनां च मन्त्रबीजाक्षरस्य च ।
तथाऽभ्युदयवाक्यानामन्येषां च विशेषतः ॥ १६१ ॥

शक्तिसंवर्धकश्च स्यात्संस्कारो द्विविधः परः ।
तत्र व्याकरणादेको योगानुष्ठानतोऽपरः ॥ १६२ ॥

संस्कारद्वयसंपन्नश्चैवं शब्दः प्रशस्यते ।
तादृशीं शक्तिसंपन्नां वाचमर्थोऽनुधावति ॥ १६३ ॥

तस्माद्व्याकरणाङ्गं च मुख्यं स्याद्वेदसंमितम् ।
ब्रह्म सर्वस्वविज्ञानसाधनं चेति निर्णयः ॥ १६४ ॥

अथ शिक्षाख्यमङ्गं स्यात्तदित्थं परिबुध्यते ।
द्वितीयं शब्दसार्थक्यसिद्धये तदुदाहृतम् ॥ १६५ ॥

शिक्ष्यते हि यया सर्वपदार्थश्च यथाविधि ।
तस्य चावश्यकत्वं च सा शिक्षेति निगद्यते ॥ १६६ ॥

विना शिक्षां हि भाषाया विधानस्यानुपस्थितिः ।
ततः शिक्षासमेतं च बोध्यं व्याकरणं भवेत् ॥ १६७ ॥

वर्णानां प्राकृतोत्पत्तिरित्थमस्यां निरूपिता ।
शरीरेऽस्मिंश्च नाभ्यां तु वर्तते कमलद्वयम् ॥ १६८ ॥

एकं वामस्थमपरं दक्षिणस्थं चकास्ति च ।
यथाकार्यं हि वाय्वग्न्याकाशयोगोऽत्र जायते ॥ १६९ ॥

अभिप्रायो यथा यस्य कार्यं कर्म तथा भवेत् ।
तस्य कर्म तथाभूतं तां नाडीं कमलायनीम् ॥ १७० ॥

समाविशश्च सद्गुरःप्रदेशं याति तत्र हि ।
नादो भूत्वाथ कण्ठादिस्थानं गच्छद्यथाक्रमम् ॥ १७१ ॥

तच्चोपलभते वर्णरूपं शब्दस्य सर्वथा ।
स्वरूपं चेति शब्दानामुत्पत्तिरिह वर्णिता ॥ १७२ ॥

यदुक्तं कमलं तस्य वामभागेन कस्य चित् ।
वर्णस्योच्चारणं चापि कस्य चिद्दक्षिणेन हि ॥ १७३ ॥

कस्य चिन्मध्यभागेन भवेद्वाय्वादियोगतः ।
इति केचिद्वदन्त्यत्र केचिदित्थं वदन्ति च ॥ १७४ ॥

स्वराणां दक्षिणेनैव भागेनोच्चारणं भवेत् ।
वामेन व्यञ्जनानां तु पुनश्चैतद्द्वयोरपि ॥ १७५ ॥

सामानाधिकरण्यं च ह्युरोदेशेऽभिजायते ।
ततः प्रकाशः शब्दानां वर्णानां वेति निर्णयः ॥ १७६ ॥

एवं हि देहसंपत्तिर्यस्य वै नियता भवेत् ।
कमलद्वयसामीप्यं नियतं चैव यस्य हि ॥ १७७ ॥



वर्णस्योच्चारणं तस्य मध्यभागेन जायते ।
स्वराणां व्यञ्जनानां च तत्राऽभेदोऽस्ति सर्वथा ॥ १७८ ॥

पद्मस्य चैकदेशित्वात्सामीप्याच्च विशेषतः ।
शब्दानां च स्वरूपं हि विज्ञेयं चेत्थमेव हि ॥ १७९ ॥

पूर्णे च कमलद्वंद्वे यथावस्थितवर्त्मनि ।
पूर्णवाय्वादियोगे च सति शब्दस्य सर्वथा ॥ १८० ॥

उच्चारणं भवेदेवं सुस्पष्टं मधुरं तथा ।
सुस्वरं सुलभं चैव प्रियं सुखकरं तथा ॥ १८१ ॥

श्राव्यं शान्तिप्रदं चैव सुप्रयुक्तं प्रहर्षदम् ।
इति सूक्ष्मं तथा स्थूलं कमलं देहसंस्थितम् ॥ १८२ ॥

भाति क्वचिच्च सामीप्यमसामीप्यं क्वचिद्भवेत् ।
तस्यैव चेति विज्ञेयं साधुशब्दप्रवर्तकैः ॥ १८३ ॥

कमलस्य सति स्थौल्ये भवेत्स्थूलं च सुप्रियम् ।
वचनं च तथा तस्य सूक्ष्मत्वे सति तादृशम् ॥ १८४ ॥

वचनं सुप्रियं चैवं सूक्ष्मस्य कमलस्य हि ।
सामीप्ये सति चाभाति सुन्दरं वचनं तथा ॥ १८५ ॥

स्थूलस्य कमलस्यापि सामीप्ये सति जायते ।
अप्रियं वचनं स्थूलमिति शिक्षा निरूपितम् ॥ १८६ ॥

इत्थं प्रयत्नभेदश्च शब्दस्यावश्यकोऽत्र हि ।
वर्णितोऽस्त्यस्य रूपं तु द्विविधं परिकथ्यते ॥ १८७ ॥

बाह्याभ्यन्तरभेदेन प्रयत्नस्य यथाविधि ।
अभिप्रायस्य वर्णेन सहयोगो यथाक्रमम् ॥ १८८ ॥

आभ्यन्तरप्रयत्नेन जायते नियतेन हि ।
प्रत्येकं चैव वर्णानां योगाच्छक्तेश्च वर्धकः ॥ १८९ ॥

योऽसौ बाह्यप्रयत्नः स्यादिति शिक्षानिरूपितम् ।
एवं प्रयत्नकार्याणि प्रोक्तान्यत्र विशेषतः ॥ १९० ॥

किञ्च शिक्षाविधेयस्य चार्थस्य प्रणवेक्षणात् ।
एवं त्रैविध्यमत्रोक्तं यथाविधि महर्षिणा ॥ १९१ ॥

स्थानप्रयत्नवर्णाश्च ह्यभिप्रायानुरोधिनः ।
सन्ति तत्र च वर्णेन त्वयमात्मा निरूपितः ॥ १९२ ॥

अकाराक्षरवाच्यश्च ज्ञानरूपः सनातनः ।
अथानात्मा प्रयत्नेन ह्युकारार्थः क्रियापरः ॥ १९३ ॥

प्रोक्तस्ततो मकारार्थं परं ब्रह्म सशक्तिकम् ।
नेति नेतीति कथितं स्थानेनात्र निरूपितम् ॥ १९४ ॥

तस्मादोङ्काररूपा च शिक्षेति हि निगद्यते ।
एवं शिक्षाङ्गतत्त्वार्थः संग्रहेण निरूपितः ॥ १९५ ॥



अथ कल्पाख्यमङ्गं तु तृतीयं मुनिभाषितम् ।
तच्च व्यवस्थापरं स्यादत्रैवं प्रतिपादितम् ॥ १९६ ॥

विषयानुभावना च विषयस्य क्रमस्तथा ।
विषयावश्यकत्वं च सक्रमं च सकारणम् ॥ १९७ ॥

व्यवस्थायाः स्वरूपं च यथावस्थं विशेषतः ।
सह शब्दैश्च संबन्धः प्रयोगौचित्यमाश्रुतम् ॥ १९८ ॥

शब्दानां चैव विषये प्रथमादिक्रमस्तथा ।
आरंभश्च समाप्तिश्च विधिश्च विषयस्य हि ॥ १९९ ॥

आद्यन्तमध्यसंस्थाननियमश्चेति चात्र हि ।
वर्णितं च ह्यभिप्रायोत्पत्तिकारणमेव च ॥ २०० ॥

यथातत्त्वं यथान्यायं यथाविधि यथाक्रमम् ।
एवमध्ययनं चापि बालानां च यथावयः ॥ २०१ ॥

यथाबुद्धि यथाशक्ति यथाकार्यं यथाबलम् ।
यथाप्रवृत्तिधर्मं च यथाभिप्रायमेव च ॥ २०२ ॥

यद्यथाव्यवसायं च सर्वं समुपपादितम् ।
तथा प्रणवदृष्ट्या च कल्पाङ्गं त्रितयं भवेत् ॥ २०३ ॥

अभिप्रायेण चात्मायमकारार्थश्च बुध्यते ।
ज्ञाननिष्ठस्तथानात्मा चोकारार्थः क्रियापरः ॥ २०४ ॥

सक्रमेण प्रकारेण कथितस्तस्य कारणम् ।
तयोः संबन्धरूपं च निषिद्धं च सशक्तिकम् ॥ २०५ ॥

तन्मकारपरं ब्रह्म प्रसिद्धं प्रतिपादितम् ।
एवं कल्पाङ्गमुख्यार्थः संग्रहेण निरूपतः ॥ २०६ ॥

ततः परं निरुक्ताख्यं चतुर्थं चाङ्गमुच्यते ।
शब्दार्थपरमिदं स्यात्कोशत्वेनास्य संस्थितिः ॥ २०७ ॥

तद्भाषानुगतं चैव कोशतत्त्वं व्यवस्थितम् ।
प्रत्येकं चैव शब्दानामर्थस्तत्कारमं तथा ॥ २०८ ॥

संबन्धोग्राहकश्चैव क्रमश्चापि स्वरस्तथा ।
एकस्यैव हि शब्दस्य बह्वर्थपरिकल्पनम् ॥ २०९ ॥

पदानां च परिच्छेदो ह्यन्वयश्च विशेषतः ।
इति सर्वं निरुक्ताङ्गे सम्यगेव निरूपितम् ॥ २१० ॥

तत्रान्वयास्त्रयः प्रोक्ताः प्रथमो दण्डसंज्ञकः ।
खण्डान्वयो द्वितीयः स्यात्ततः शुद्धान्वयो मतः ॥ २११ ॥

कर्तृकर्मक्रियाणां च ह्यन्वयः परिकथ्यते ।
कर्ता ह्यकारवाच्यः स्यादात्मा सर्वेश्वरः प्रभुः ॥ २१२ ॥

कर्म ह्युकारवाच्यं स्यात्क्रियानिष्ठं ततः परम् ।
तयोः संबन्धरूपं च क्रियापदमुदाहृतम् ॥ २१३ ॥



मकारवाच्यं तन्मध्यवर्तियोगप्रदर्शकम् ।
त्रयाणामन्वयोऽप्येवं त्रिविधः प्रणवेक्षणात् ॥ २१४ ॥

अस्ति शुद्धान्वयस्तत्र ह्यात्मधर्मप्रदर्शकः ।
अनात्मधर्मवक्ता च भवेद्दण्डान्वयस्ततः ॥ २१५ ॥

समाहारार्थकश्चैव हीच्छानिष्ठः परावरः ।
भवेत्खण्डान्वयश्चेति विज्ञेयं तत्त्वतः क्रमात् ॥ २१६ ॥

निश्चयेनोच्यते सर्वपदार्थो येन च क्रमात् ।
निरुक्तं तद्धि विज्ञेयं शब्दार्थानां निदर्शकम् ॥ २१७ ॥

एवं निरुक्तशब्दार्थो मुनिनात्र हि वर्णितः ।
इत्थं हि संग्राहेणात्र निरुक्ताङ्गो विचारितः ॥ २१८ ॥

ततः परमिदं छन्दः पञ्चमं चाङ्गमुच्यते ।
क्रमप्रज्ञापकं तच्च प्रभवेद्गद्यपद्ययोः ॥ २१९ ॥

सर्वेषां चैव वर्णानां शब्दानां च विशेषतः ।
विषयाणां तथैव स्यात्समाहारोऽत्र कीर्तितः ॥ २२० ॥

विषयादेव शब्दानां क्रमश्चोपस्थितो भवेत् ।
स्वरादीनां प्रयोगश्च तस्मादेव यथाक्रमम् ॥ २२१ ॥

यथास्वरं हि शब्दानां छन्दश्च विहितं भवेत् ।
एवं विज्ञायते चास्मिन्स्वरेऽपि त्रितयक्रमः ॥ २२२ ॥

उदात्तो ह्यनुदात्तश्च स्वरितश्चेति भेदतः ।
परिवर्तनेन तेषां स्वराः सप्त भवन्ति हि ॥ २२३ ॥

षड्जर्षभौ च गान्धारमध्यमौ पञ्चमस्तथा ।
दैवतश्च निषादश्चेत्येषां रूपमिदं भवेत् ॥ २२४ ॥

षड्जस्त्वात्मपरो ज्ञेयो ह्यकारस्थस्तथा पुनः ।
उदात्तेनानुदात्तेन प्रयुक्तश्चैव दृश्यते ॥ २२५ ॥

स्वरितोदात्तयुक्तश्च ऋषभः स्यात्क्रियापरः ।
तथा ह्युकारनिष्ठश्च गान्धारस्तु मकारजः ॥ २२६ ॥

स्वरितानुदात्तयुक्तो नेतिरूपश्च दृश्यते ।
स्युरेकोनविंशतयो मूर्छनाश्च स्वरे तथा ॥ २२७ ॥

त्रिभिः क्रमैरेव तेषां प्रत्येकमिति निर्णयः ।
एवं भेदः स्वराणां हि चानन्तः परिकथ्यते ॥ २२८ ॥

तेषामेव सप्त संज्ञा भवन्त्येवं विशेषतः ।
गुरुलघुह्रस्वदीर्घप्लुतव्याप्लुतभेदतः ॥ २२९ ॥

व्याह्रस्वतश्चेति तेषां चानन्तो हि क्रमो भवेत् ।
सङ्गीतशास्त्रविषयमिदं सर्वमिति स्थितिः ॥ २३० ॥

सङ्गीतं शब्दपूर्णं स्याच्छब्दश्चात्मायमुच्यते ।
आत्मनः परिपूर्णत्वं सङ्गीतादवगम्यते ॥ २३१ ॥



भावानुकथनं गीतमिति छन्दो विधीयते ।
ततः शब्दक्रमाकांक्षि छन्दश्चेति निगद्यते ॥ २३२ ॥

अत्र त्रितयविज्ञानं तादृशक्रममुच्यते ।
तदनुष्टुब्दण्डकेन्द्रा इति विज्ञायतेऽत्र हि ॥ २३३ ॥

छन्दसां परमानुष्टुप्चायमात्मेति कथ्यते ।
अकारार्थो दण्डकं तु संसारपरमुच्यते ॥ २३४ ॥

एतद्रूपमुकारस्थं तदिन्द्रं चेदमुच्यते ।
नकारात्म प्रशस्तं च मकाराक्षरसंभवम् ॥ २३५ ॥

परिवर्तनतश्चैव तेषां त्वेवं निवर्तनात् ।
सन्ति छन्दांस्यनेकानि तदिदं प्रणवोद्धृतम् ॥ २३६ ॥

तस्माच्च संभवन्त्यत्र यथाक्रमलसंस्थिति ।
अनन्तान्येव छन्दांसि चेति ज्ञेयं मनीषिभिः ॥ २३७ ॥

किञ्चात्र वर्णमात्राभ्यां वृतिःस्याद्विविधा मता ।
आभ्यां द्विनवलक्षाणि छन्दांसि प्रभवन्ति हि ॥ २३८ ॥

शब्दमात्रस्य शक्तेश्च छन्दस्तु परिवर्धकम् ।
एवं छन्दोङ्गमुख्यार्थः संग्रहेण निरूपितः ॥ २३९ ॥

ततः परं ज्यौतिषाख्यमङ्गं षष्ठं निगद्यते ।
क्रियाव्यवहारपरं शक्तिमात्रादिबोधकम् ॥ २४० ॥

माला च तत्त्वरूपा स्याच्छक्तिः कार्यस्य साधनम् ।
शब्दे च यादृशी शक्तिश्चैवमेव हि तादृशम् ॥ २४१ ॥

कार्यं भवति तस्माद्वै शक्तिमात्रास्वरूपधीः ।
जायते ज्यौतिषेणैव चेति ज्ञेयं मनीषिभिः ॥ २४२ ॥

प्रत्येकं परमाणूनां वाय्वादीनां च निर्णयः ।
अयं चाल्पोऽधिकोऽयं स्यात्समाहारो ह्ययं भवेत् ॥ २४३ ॥

कार्येऽस्मिन्नस्य चाधिक्यं न्यूनतास्यैव तादृशी ।
भवत्येवमनेनैव नवेतीत्यादिकं च यत् ॥ २४४ ॥

सर्वं तज्ज्यौतिषेणैव विज्ञेयमिति निर्णयः ।
स्त्रियश्च पुरुषस्यैवमसाम्यं साम्यमेव च ॥ २४५ ॥

यथाकालं हि कार्यस्य निर्णयस्तत्त्वलक्षणः ।
संबन्धश्चानुकूल्यं च प्रातिकूल्यं परस्परम् ॥ २४६ ॥

अल्पत्वं च तथाधिक्यं नाशः सृष्टिश्च कारणम् ।
शक्तिमात्रापरिज्ञानं चेति ज्यौतिषभाषितम् ॥ २४७ ॥

ज्यौतिषेऽस्मिन्विधानानि भवन्ति त्रीणि सर्वथा ।
फलितं गणितं चैव प्रवृत्तितमिति क्रमात् ॥ २४८ ॥

तेषां स्वरूपमित्थं च ह्यवस्थाया निरूपणम् ।
फलितं चात्र गणितं विशिष्टस्य ह्यवस्थया ॥ २४९ ॥



परिज्ञानं च सर्वेषां समाहारस्वरूपवत् ।
सामुद्रिकं प्रवृत्तितं स्यादित्युक्तं विशेषतः ॥ २५० ॥

तस्माज्ज्योतिश्शास्त्रमिदं सर्वप्रगणनार्थकम् ।
सर्वानुभवबोधार्थं वेदाङ्गं च परं भवेत् ॥ २५१ ॥

एवं हि ज्यौतिषाङ्गस्य प्रोक्तोऽर्थः संग्रहेण च ।
इदमुत्तममङ्गानां प्रत्यक्षावगमं भवेत् ॥ २५२ ॥

इत्थं धर्मावबोधार्थं साङ्गो वेदो निरूपितः ।
धर्मवानेव पुरुषः प्राप्नोति परमं पदम् ॥ २५३ ॥

चतुर्दशे तरङ्गेऽस्मिन्साङ्गवेदस्य चोच्यते ।
अध्ययनक्रमश्चायं यथातत्त्वं यथाविधि ॥ २५४ ॥

स्वाध्यायोऽध्येतव्य इति वचनादेव सर्वथा ।
वेदाध्ययनमुख्यत्वं मुनिना प्रतिपादितम् ॥ २५५ ॥

आत्मभावपरिज्ञानं भवेदध्ययनात्परात् ।
आत्मभावाऽपरिज्ञानमनध्ययनतो भवेत् ॥ २५६ ॥

अतो ह्यात्मपरोऽध्यायश्चानध्यायस्तथाऽपरः ।
भवेत्संसारनिष्ठश्च पर्यध्यायस्तृतीयगः ॥ २५७ ॥

अकारोकारमकारवर्णैस्ते संस्तुताऽभवन् ।
ज्ञाननिष्ठाः क्रियानिष्ठाश्चेच्छानिष्ठाः क्रमेण हि ॥ २५८ ॥

यथा निर्दिष्टकालं च सर्वकार्यक्षमा मताः ।
आरंभलक्षणोऽध्यायो भवेच्चैवावसानतः ॥ २५९ ॥

अनध्यायः प्रकथितः पर्यध्यायः समात्मकः ।
उक्तोऽध्यायादिकालश्च भवेच्छिष्टानुसंमतः ॥ २६० ॥

सर्वेषां चैव नियता यथारूपं यथाक्रमम् ।
स्वाध्यायाद्यास्त्रयश्चैते संसारव्यवसायदाः ॥ २६१ ॥

ज्ञानक्रियेच्छाभियुक्ताः प्रणवार्थपरायणाः ।
पर्याध्यायस्तु यस्तत्र तृतीयः स च योगिनाम् ॥ २६२ ॥

ऋषीणां व्यवहारार्थं नियतः साम्यलक्षणः ।
नैव तत्र च सर्वेषामधिकारः प्रकीर्तितः ॥ २६३ ॥

स्वाध्यायं तमनध्यायं समाप्यैव यथाविधि ।
पर्यध्यायं विशेद्योगी सर्वज्ञस्तत्त्वविच्छुचिः ॥ २६४ ॥

समाध्यायस्तुरीयश्च योगात्मा योगिवल्लभः ।
सर्वातीतस्वरूपस्य ब्रह्मणोऽयं हि बोधकः ॥ २६५ ॥

तत श्चैवं क्रमेणैवाध्ययनं हि प्रशस्यते ।
वेदाङ्गाध्ययनं चैवं प्रशस्तमिति कथ्यते ॥ २६६ ॥

भवेच्छब्दार्थविज्ञानं वेदाध्ययनतस्तथा ।
शब्दशक्तिपरिज्ञानं वेदाङ्गादेव जायते ॥ २६७ ॥



शब्दशक्तिप्रभूतानि षट्कर्माणि भवन्ति च ।
वश्यादिमारणान्तानि सर्वं स्याच्छब्दशक्तितः ॥ २६८ ॥

तस्माद्वेदानशेषांश्च साङ्गान्वै सप्रकारकान् ।
यथाक्रमं यथाकालं यथारूपं यथाविधि ॥ २६९ ॥

समधीत्य तदर्थांश्च परिज्ञाय यथार्थतः ।
ब्रह्मस्वभावतत्त्वज्ञो ब्रह्मकार्याय सज्जते ॥ २७० ॥

य एवं पुरुषो विद्वान्ब्राह्मणः सोऽयमुच्यते ।
जगतोऽस्य देवता स्यात्स साक्षी सर्वकर्मणाम् ॥ २७१ ॥

सर्वकर्ता नियन्ता च यथाकालं यथाभवम् ।
लोकसंरक्षको धीमान्प्रशान्तात्मा जितेन्द्रियः ॥ २७२ ॥

पूर्णः सर्वसमश्चैव सर्ववन्द्यः स वै भवेत् ।
प्रशस्तं विद्ययैव स्याद्ब्राह्मण्यं नैव जातितः ॥ २७३ ॥

ऋणं भवति यत्तच्च मुक्तेः स्यात्प्रतिबन्धकम् ।
ऋणनिर्मोचनं तस्मात्सर्वेषां त्रिहितं भवेत् ॥ २७४ ॥

पित्र्यदैवार्षभेदेन स्यादृणं त्रिविधं मतम् ।
अकारादिक्रमेणैतत्प्रणवेन निरूपितम् ॥ २७५ ॥

आर्षं भवेदृणं यच्च मुक्तेस्तु प्रतिबन्धकम् ।
निवर्तते साङ्गवेदाध्ययनादेव तत्पुनः ॥ २७६ ॥

प्रथमं ह्युपनीतश्च छन्दसां मातरं च ताम् ।
स्वीकरोति च यः सोऽयं महावाक्यं ततोऽभ्यसेत् ॥२७७॥

ततः परं च वेदाङ्गान्यध्येयानि यथाक्रमम् ।
ततोऽध्येयाः शुक्लकृष्णशाखया च समन्विताः ॥ २७८ ॥

उपवेदास्ततश्चैव ब्राह्मणानि तथा पुनः ।
ततो वेदाश्च सर्वेऽपि ह्यध्येयाः स्युर्यथाक्रमम् ॥ २७९ ॥

ततश्चैवं महावाक्यं गायत्रीं च परावराम् ।
समभ्यसेद्यथाकामं तस्माज्ज्ञानं विवर्धते ॥ २८० ॥

एवं हि वेदवेदाङ्गाध्ययनस्य क्रमो भवेत् ।
ब्रह्मजिज्ञासुभिश्चायं बोध्यो भवति सर्वथा ॥ २८१ ॥

अथ पञ्चदशेऽस्मिंश्च तरङ्गे तु महर्षिणा ।
वर्ण्यन्ते षडुपाङ्गानि वेदसाध्यानि सर्वशः ॥ २८२ ॥

अङ्गैश्च वेदमात्रस्य पूर्णो बोधोऽभिजायते ।
वेदप्रकारविज्ञानमुपाङ्गैरभिजायते ॥ २८३ ॥

विस्तारश्च तथाल्पत्वं संसारे परिदृश्यते ।
ताभ्यां युक्तश्चायमात्मा ह्युपाङ्गैर्वर्णितो भवेत् ॥ २८४ ॥

यच्च तत्त्वं हि वेदस्य वेदाङ्गस्य च यत्पुनः ।
ज्ञानेच्छाक्रियापरं च परिवर्तनतत्परम् ॥ २८५ ॥



तच्च सर्वमुपाङ्गैस्तु व्याख्यातं स्याद्यथाविधि ।
समवर्तनसिद्धान्तो ह्युपाङ्गार्थः प्रकीर्तितः ॥ २८६ ॥

इत्थमङ्गोपाङ्गयोस्तु भेदो ज्ञेयो मनीषिभिः ।
यच्च शब्दात्मकं ब्रह्म तस्यैतानि भवन्ति हि ॥ २८७ ॥

अङ्गानि स्थूलरूपाणि तथोपाङ्गानि षट् पुनः ।
ज्ञानेन्द्रियाणि षट् चेति विज्ञेयं तत्त्ववादिभिः ॥ २८८ ॥

इत्थं हि तान्युपाङ्गानि चैकार्थानि भवन्ति षट् ।
वेदान्तश्चाथ मीमांसा न्यायो वैशेषिकस्तथा ॥ २८९ ॥

योगः सांख्यं चेति तत्र वेदान्तः प्रथमो मतः ।
सार्वत्रिकस्य सर्वस्य त्रितयस्य च निश्चयः ॥ २९० ॥

उपाङ्गप्रथमेनैव वेदान्तेनावगम्यते ।
ततो ब्रह्मपराः सन्ति वेदान्ता ज्ञानसंस्थिताः ॥ २९१ ॥

प्रत्येकं परमाणूनां चैकरूपा च सा भवेत् ।
प्रधानसत्ता तस्यां हि क्रिया ह्यन्तर्गता मता ॥ २९२ ॥

स्यात्क्रियान्तर्गतश्चात्मा तस्मिन्नन्तर्गतं भवेत् ।
परायणं परं ब्रह्म त्रितयं चेति बुध्यते ॥ २९३ ॥

प्रधानसत्ता प्रत्येकमणूनां या ह्युपस्थिता ।
प्रधानव्यवसायश्च तत्फलं च व्यवस्थितम् ॥ २९४ ॥

सामान्यं च विशेषश्च सर्वमेतदशेषतः ।
वेदान्तोपाङ्गनिर्णीतमिदं वेद्यं मनीषिभिः ॥ २९५ ॥

सर्वस्यैकत्वविज्ञानं वेदान्तेनैव जायते ।
पुमान्विज्ञाय संसारं वेदान्तेऽधिकृतो भवेत् ॥ २९६ ॥

ब्रह्मणश्चैव जिज्ञासामात्रं वेदान्तभाषितम् ।
द्वित्वैकत्वबोधकं च संसारस्य हि तद्भवेत् ॥ २९७ ॥

एवं यज्ज्ञानविषयं सर्वं सांसरिकं च तत् ।
आत्मनिष्ठास्वरूपं च वेदान्तोपाङ्गवर्णितम् ॥ २९८ ॥

जिज्ञासा चोत्तरं चैव परितोषस्त्रयस्त्विमे ।
प्रणवार्थपराः स्युस्ते वेदान्तोपाङ्गभाषिताः ॥ २९९ ॥

अथोपाङ्गं द्वितीयं तु मीमांसाख्यं प्रकीर्तितम् ।
इदं कर्मपरं चास्ति त्रैविध्यं त्वत्र कथ्यते ॥ ३०० ॥

पूर्वोत्तराऽपरत्वेन चेत्थं तेषां हि लक्षणम् ।
तदात्मविषयाणां च बोधकत्वं हि कर्मणाम् ॥ ३०१ ॥

मीमांसायास्तु पूर्वस्याः स्वरूपं चेति वर्णितम् ।
मीमांसायाश्चोत्तरस्याः संसारपरकर्मणः ॥ ३०२ ॥

बोधकत्वं स्वरूपं स्यादपरस्याश्च कृत्स्नशः ।
मीमांसाया बोधकत्वं प्रळयाख्यस्य कर्मणः ॥ ३०३ ॥



स्वरूपं चेति तत्सर्वं प्रणवार्थपरं भवेत् ।
क्रियास्तिस्रस्तिसृभिश्च मीमांसाभिप्रचोदिताः ॥ ३०४ ॥

सन्ति ब्रह्मपराश्चैव प्रणवार्थपराश्च ताः ।
एतत्समाहारपरा मीमांसा चेति कथ्यते ॥ ३०५ ॥

मीमांसेति च संज्ञाऽस्याः कर्माख्यानत्वनिश्चयात् ।
भवत्येवेति विज्ञेयं मीमांसार्थोऽयमुच्यते ॥ ३०६ ॥

त्रीणि वर्णानि मीमांसाशब्दे सन्तीति बुध्यते ।
यथार्थं चैव तेषां स्यादर्थश्चेत्थं हि शास्त्रतः ॥ ३०७ ॥

अक्षरः प्रथमो मी च यस्तस्यार्थो मृतक्रिया ।
मृतमेतच्च संसारः क्रिया तस्येति निश्चयः ॥ ३०८ ॥

मकारस्य द्वितीयस्य चार्थस्त्वात्माऽयमुच्यते ।
साकारस्य तृतीयस्य निषेधः प्रळयार्थकः ॥ ३०९ ॥

तथा संबन्धरूपश्चेत्युक्तोऽर्थः संग्रहेण हि ।
तस्मान्मृतक्रियायां हि मांसार्थौ भवतः सदा ॥ ३१० ॥

इति संग्रहवाक्यार्थो मुनिना प्रतिपादितः ।
आत्मानात्मब्रह्मपरास्तिस्त्रश्चोक्ताः क्रियास्त्विह ॥ ३११ ॥

तस्मात्कर्मविधानं च मीमांसाशास्त्रचोदितम् ।
ततः सार्वत्रिकं कर्म सर्वावश्यकमेव च ॥ ३१२ ॥

सर्वोपकारकं तच्च भवेन्मोक्षप्रदं तथा ।
ब्रह्मभावप्रापकं च भवतीति सुनिश्चितम् ॥ ३१३ ॥

विना ज्ञानं केवलेन कर्मणा नैव जायते ।
मोक्षश्चेति हि सिद्धान्तो मुनिना प्रतिपादितः ॥ ३१४ ॥

यज्ञेषु कर्मसिद्धेषु जीवहिंसा च दृश्यते ।
सुरापानादिकं चैव निषिद्धं ह्यत्र यद्यपि ॥ ३१५ ॥

तथाप्यत्र रहस्यार्थश्चेत्थं तस्य निरूपितः ।
पशुं हन्यादिति विधौ हनधातुप्रयोगतः ॥ ३१६ ॥

पशुसंज्ञपदार्थस्य विज्ञानं विधिचोदितम् ।
गतिर्हि हनधात्वर्थो गतिर्ज्ञानं गतिस्तथा ॥ ३१७ ॥

गमनं च गतिर्मोक्षो गतिः प्राप्तिरितीर्यते ।
पशुर्भवति चात्मायमतो ज्ञानं विधीयते ॥ ३१८ ॥

सुरां पिबेदिति विधौ चामृतत्वं निगद्यते ।
ब्रह्मभावं हि संप्राप्य चामृतत्वं प्रपद्यते ॥ ३१९ ॥

पुमानिति हि सर्वत्र श्रुतिषु प्रतिपादितम् ।
एवमेव रहस्यार्थो विधिवाक्येषु दृश्यताम् ॥ ३२० ॥

मीमांसायां तु कर्मैवं त्रिविधं परिकथ्यते ।
प्रारब्धं सञ्चितं प्राप्तं चेति प्रारब्धमुच्यते ॥ ३२१ ॥



यच्च पूर्वकृतं कर्म चैवं सञ्चितमुच्यते ।
इदं पुनरिदं चेति प्राप्तमेवं निरूपितम् ॥ ३२२ ॥

इदानीं क्रियते कर्म चेति सर्वं यथार्थतः ।
प्रारब्धान्तर्गतं कर्म तस्मादेव हि कर्मणाम् ॥ ३२३ ॥

प्रारब्धं सञ्चितं प्राप्तं चेति त्रिविधमेव हि ।
स्यादवस्थारूपमिति प्रोच्यते हि महर्षिणा ॥ ३२४ ॥

तस्माद्वै त्रितयं कर्म समाहारपरं भवेत् ।
मीमांसाशास्त्रसंपन्नं प्रविष्टं प्रणवावृतम् ॥ ३२५ ॥

ततस्तृतीयं न्यायाख्यमुपाङ्गं स्याच्च तस्य हि ।
कार्यनिर्णायकत्वेन स्वरूपं च व्यवस्थितम् ॥ ३२६ ॥

सर्वेषां च पदार्थानां यथार्थज्ञानसिद्धये ।
न्यायोपाङ्गं समध्येयमिदमेव हि निर्णयः ॥ ३२७ ॥

आत्मा चानात्मभिन्नः स्यादनात्मा चात्मभेदवान् ।
इति निर्णायकत्वेन प्रकाराः सन्ति षोडश ॥ ३२८ ॥

प्रकाराश्च पदार्थाः स्युस्ते चैवं परिकीर्तिताः ।
प्रमाणं च प्रमेयश्च संशयश्च प्रयोजनम् ॥ ३२९ ॥

दृष्टान्तसिद्धान्ताऽवयवतर्कवादजल्पनम् ।
वितण्डा निर्णयश्चैव ते जातिच्छलहेतवः ॥ ३३० ॥

आभासश्चेति सर्वं हि त्रितयात्मकमुच्यते ।
ज्ञानेच्छाक्रियापरं च प्रमाणं त्वात्मसंस्थितम् ॥ ३३१ ॥

ज्ञानांशं चैव सर्वेषां परं निर्णायकं भवेत् ।
भवेदनात्मरूपश्च प्रमेयो हि क्रियापरः ॥ ३३२ ॥

इच्छापरः संशयः स्यात्त्रयो मुख्या यथाक्रमम् ।
अकारोकारमकारसंस्थिताश्चेति निर्णयः ॥ ३३३ ॥

अन्ये सर्वे पदार्थाश्च त्रिष्वेष्वन्तर्गता मताः ।
प्रमाणादित्रयाणां च समाहारः प्रयोजनम् ॥ ३३४ ॥

प्रमाणस्य क्रमश्चैव दृष्टान्त इति बुध्यते ।
ततो भवति दृष्टान्तः प्रमाणान्तर्गतो मतः ॥ ३३५ ॥

प्रमेयस्य क्रमस्त्वत्र सिद्धान्त इति निश्चयात् ।
प्रमेयान्तर्गतश्चेति सिद्धान्तः परिबुध्यते ॥ ३३६ ॥

एवं ह्यवयवोऽप्यत्र संशयान्तर्गतो भवेत् ।
अवयवे हि सर्वेषां संशयस्य च संभवात् ॥ ३३७ ॥

प्रयोजनं च यत्र स्यात्तत्र तर्कस्तु दृश्यते ।
ततश्चोहात्मकः सोऽयं प्रयोजनपरो मतः ॥ ३३८ ॥

यतो यथा ज्ञानमेव वादश्च परिदृश्यते ।
ततो वादः प्रमाणान्तर्गत इत्यभिधीयते ॥ ३३९ ॥



यत्रात्यन्तविरोधश्च ज्ञातो भवति तत्र हि ।
जल्पनं प्रमेयपरं यतः संदृश्यते ततः ॥ ३४० ॥

प्रमाणान्तर्गतं चेति जल्पनं परिकथ्यते ।
यतः संदिग्धविषये वितण्डा दृश्यते ततः ॥ ३४१ ॥

संशयान्तर्गता चैव वितण्डा संमतात्र हि ।
सर्वं प्रयोजनं यस्मान्निर्णये सति जायते ॥ ३४१ ॥

तस्मात्प्रयोजनपरो निर्णयश्चेति कथ्यते ।
जातेर्विशेषणत्वं हि भेदधीजनकत्वतः ॥ ३४३ ॥

ज्ञायते च यतस्तस्मात्प्रमाणान्तर्गता भवेत् ।
जातिस्तथा छलश्चापि प्रमेयान्तर्गतो भवेत् ॥ ३४४ ॥

यत्कारणं तच्च हेतुः स चाज्ञेयो यतो भवेत् ।
ततश्च संशयात्मा स्याद्धेतुरित्यभिधीयते ॥ ३४५ ॥

यच्चात्र किञ्चिदाभाति यतस्तच्च प्रयोजनम् ।
ततः प्रयोजनात्मा स्यादाभासश्चेति कथ्यते ॥ ३४६ ॥

एवं ज्ञानक्रियेच्छाभिः समाहारेण च स्वतः ।
चतुर्विधः पदार्थः स्याच्चतुर्णां परिवर्तनात् ॥ ३४७ ॥

भवन्ति षोडशैवैते पदार्थाश्च पुनस्तथा ।
परिवर्तनेन तेषां चतुष्षष्टिरिति क्रमः ॥ ३४८ ॥

परिवर्तनादेवमेव संख्याऽनन्ता विभाव्यते ।
यत्स्यादणूनां प्रत्येकं रूपं तन्न्यायवर्णितम् ॥ ३४९ ॥

प्रणवाक्षरदृष्ट्या तु न्यायः स्यात्त्रिविधो मतः ।
तत्त्वन्यायस्तथा लोकन्यायश्चैव तथा परः ॥ ३५० ॥

प्रशस्तन्याय इति तत्तत्त्वमेवं विभाव्यते ।
यश्चास्त्यात्मपरो न्यायस्तत्त्वन्यायः स कथ्यते ॥ ३५१ ॥

स्याद्यश्च संसारपरो लोकन्यायः स चोच्यते ।
यश्च ब्रह्मपरो न्यायः स प्रशस्तो भवेदतः ॥ ३५२ ॥

न्यायरूपमुपाङ्गं स्यात्तत्त्वनिर्णायकं परम् ।
वैशेषिकमुपाङ्गं हि चतुर्थमथ चोच्यते ॥ ३५३ ॥

सांसारिकाणां सर्वेषां पदार्थानामिह क्रमात् ।
प्रत्येकं गणनं यच्च विशेषेण स्वभावतः ॥ ३५४ ॥

तच्च वैशेषिकं प्रोक्तं पदार्थाः सप्त तत्र हि ।
ये न्यायदर्शिताश्चैव पदार्थाः षोडश स्वतः ॥ ३५५ ॥

तेषां विशेषविधया सप्तसंख्यात्र कीर्तिता ।
द्रव्यं गुणस्तथा कर्म सामान्यं सविशेषकम् ॥ ३५६ ॥

समवायस्तथाभावश्चेति ते समुदाहृताः ।
न्यायवैशेषिकाभ्यां च यथासंख्यं हि जायते ॥ ३५७ ॥



सामान्यविशेषधीश्च पदार्थानां यथाविधि ।
तस्माद्ब्रह्माण्डनिर्माणविज्ञानस्य हि साधनम् ॥ ३५८ ॥

वैशेषिकमुपाङ्गं स्यादित्यत्र हि निरूपितम् ।
अत्र प्रणवदृष्ट्या हि पदार्थाश्च त्रयो मताः ॥ ३५९ ॥

द्रव्यं गुणः कर्म चेति तत्रैवं द्रव्यमुच्यते ।
इच्छापरं प्रशस्तं च सर्वसंबन्धमूलकम् ॥ ३६० ॥

इत्येवं हि गुणश्चात्मा कर्म चानात्मतत्परम् ।
सर्वं हि द्रव्यमूलं स्याद्विना द्रव्यं न किञ्चन ॥ ३६१ ॥

द्रव्यं शक्तिस्वरूपं स्याद्द्रव्यात्सर्वाश्च शक्तयः ।
द्रव्यगुणकर्मणां च समाहारस्वरूपवत् ॥ ३६२ ॥

सामान्यमिति विज्ञेयं तच्च द्रव्यादिसंस्थितम् ।
सामान्यान्तर्गतश्चैव विशेषः परिदृश्यते ॥ ३६३ ॥

द्रव्यगुणकर्मणां च यः सामान्यविशेषयोः ।
संबन्धश्च स विज्ञेयः समवाय इतीर्यते ॥ ३६४ ॥

समवायवतामैक्यमभाव इति निर्णयः ।
अभावस्य तु नास्तित्वं लक्षणं समुदाहृतम् ॥ ३६५ ॥

चातुर्विध्यमभावस्य सर्वत्र हि निगद्यते ।
स्मृतेस्तु केवलं यच्च विषयः स च कथ्यते ॥ ३६६ ॥

प्रागभाव इति ध्वंसो नष्टत्वेन च लक्षितः ।
यश्चेन्द्रियागोचरश्च सोऽत्यन्ताभाव इष्यते ॥ ३६७ ॥

परस्पराभाव एव ह्यन्योन्याभाव उच्यते ।
सति भेदप्रणाशेऽयमभावश्च यतो भवेत् ॥ ३६८ ॥

अतोऽस्य गणनं चैव पदार्थेषु न चोच्यते ।
अत एव पदार्थाः स्युः षट्च सांसारिका मताः ॥ ३६९ ॥

द्रव्याद्याः समवायान्ताः पदार्थास्ते प्रकीर्तिताः ।
तेषु प्रतिष्ठितं सर्वमिदं ब्रह्माण्डसंज्ञकम् ॥ ३७० ॥

क्रियातत्त्वपरं चैव येषां प्रत्येकमुच्यते ।
त्रितयत्वं चैव तेषां बोधौचित्यमिहोच्यते ॥ ३७१ ॥

एवं वैशेषिके ह्यस्मिन्सन्ति भेदास्त्रयो मताः ।
आत्मवैशेषिकं चैव क्रियावैशेषिकं तथा ॥ ३७२ ॥

अपरवैशेषिकं चेत्येतेषां लक्षणं त्विदम् ।
पदार्थानां गुणस्यैकीकरणं च यदुच्यते ॥ ३७३ ॥

आत्मवैशेषिकं तत्स्यादेवमेव हि कर्मणाम् ।
एकीकरणरूपं च भेदनिष्ठं क्रियापरम् ॥ ३७४ ॥

क्रियावैशेषिकं प्रोक्तमिच्छामात्रस्य सर्वथा ।
तदेकत्वस्वरूपं वैशेषिकं ह्यपरं मतम् ॥ ३७५ ॥



तस्मादिदं विशेषाणां विधीनां च यथायथम् ।
बोधायैव तु संप्रोक्तं भवेत्प्रणवतत्परम् ॥ ३७६ ॥

अथोपाङ्गं तु योगाख्यं पञ्चमं चेह कथ्यते ।
क्रमेण युज्यते सर्वमिति योगपदार्थतः ॥ ३७७ ॥

आत्मनश्चैव सर्वस्मिन्योगो ह्येकत्वलक्षणः ।
तथा संसारमात्रस्य योजनं च यथाक्रमम् ॥ ३७८ ॥

तदेकत्वज्ञापनेन सहितं चात्र बुध्यते ।
एकत्वबोधः सर्वत्र सर्वबोधस्तथा पुनः ॥ ३७९ ॥

एकत्र चेति योगस्य फलं हि समुदाहृतम् ।
व्यापारो येन भावेन चैक्यंभावेन येन हि ॥ ३८० ॥

तत्सर्वं सम्यगाख्यातं योगोपाङ्गे यथाक्रमम् ।
योजनव्यवहारश्च पदार्थानां हि सर्वशः ॥ ३८१ ॥

स्वात्मन्येव हि द्रष्टव्यश्चेति योगादुदीरितम् ।
प्राणायामाभिधानं च तत्परं बुध्यतेऽत्र हि ॥ ३८२ ॥

ओङ्कारादिजपोऽप्येवं भावगर्भो ह्युदाहृतः ।
ध्येयवस्तु स्वरूपस्य दार्ढ्याय हि जपो मतः ॥ ३८३ ॥

योगस्तु त्रिविधो ज्ञेयो राजयोगस्तथाऽपरः ।
हठयोगो लक्ष्ययोगश्चेति तेषामनुक्रमात् ॥ ३८४ ॥

स्वरूपं च विशेषेण वर्णितं स्यान्महर्षिणा ।
सर्वप्रकाशमूलं च राजयोगोऽभिधीयते ॥ ३८५ ॥

तथा ज्ञानपरश्चैव हठयोगश्च तादृशः ।
तद्योगकरणं चास्ति लक्ष्ययोगश्च तादृशः ॥ ३८६ ॥

इच्छाशक्तिसमाविष्टस्तृतीयः परिकथ्यते ।
सर्वलक्षणसंपन्नः परो ह्येकः सनातनः ॥ ३८७ ॥

तस्मात्सर्वमिदं योगशास्त्रं प्रणवसंस्थितम् ।
अकारादिक्रमान्तस्थं ब्रह्मसामीप्यदायकम् ॥ ३८८ ॥

ततः सांख्यमुपाङ्गं तु षष्टमत्र निगद्यते ।
तदारंभावसानाभ्यां रहितस्य च वस्तुनः ॥ ३८९ ॥

सर्वसंख्याविहीनस्य बोधः शुद्धस्य चात्मनः ।
सांख्योपाङ्गे यथातत्त्वं व्याख्यातोऽस्ति यथाविधि ॥ ३९० ॥

तस्माल्लोकेश्वरः साक्षान्महाविष्णुरितीर्यते ।
तत्परेषां च सर्वेषाममान्यत्वमुदाहृतम् ॥ ३९१ ॥

आत्मैव हि निराधारः स्वच्छन्दः सर्वगः परः ।
ब्रह्मेति तद्बोधकोऽयमोङ्कारः परिकथ्यते ॥ ३९२ ॥

इति सर्वमुपाङ्गैस्तु षड्भिश्चैव निगद्यते ।
मुमुक्षुभिरिदं वेद्यं परमार्थपरैः सदा ॥ ३९३ ॥



तस्माद्यथाक्रमं चैव ह्यकारादिक्रमेण च ।
वेदवेदाङ्गोपाङ्गानि विज्ञेयानीति निश्चयः ॥ ३९४ ॥

एतेषां चैव सर्वेषां विद्यासंज्ञात्र कीर्तिता ।
विद्याश्चेमा भवन्त्यत्र प्रसिद्धाश्च चतुर्दश ॥ ३९५ ॥

ताश्च संसारनियताः सार्वत्रिक्यः पराऽवराः ।
सर्वविज्ञानदायिन्यश्चेत्यत्र तु निरूपितम् ॥ ३९६ ॥

विद्यास्तास्तु षडङ्गैश्च षडुपाङ्गैश्च योगतः ।
वेदोपवेदोपनिषद्ब्राह्मणैः शाखया युतैः ॥ ३९७ ॥

योगात्त्रयोदश प्रोक्ता ह्यविद्या च चतुर्दशी ।
विद्यास्त्रयोदश प्रोक्ता ज्ञानरूपा भवन्ति च ॥ ३९८ ॥

अविद्या चान्तिमाऽज्ञानतत्परा चेति निर्णयः ।
तस्माद्वेदं च सर्वं हि ज्ञानाज्ञानप्रकारकम् ॥ ३९९ ॥

चतुर्दशसु विद्यासु वर्ततेऽन्तर्गतं तथा ।
सर्वो हि व्यवसायश्च सर्वे च विषयस्तथा ॥ ४०० ॥

अत्र चान्तर्गताश्चेति विज्ञेयं हि मनीषिभिः ।
ततो यथाक्रमं चैव षडङ्गानां विशेषतः ॥ ४०१ ॥

समन्वयार्थः कर्तारो व्याख्याताः स्युर्यथाविधि ।
चत्वार्यङ्गानि मुख्यानि षण्णां मध्ये च तत्र हि ॥ ४०२ ॥

अग्र्यं व्याकरणं प्रोक्तं निरुक्तं च ततो भवेत् ।
ज्यौतिषं च तृतीयं स्याच्चतुर्थं छन्द उच्यते ॥ ४०३ ॥

ज्ञानादिभिश्चतुर्भिस्तु तेषां लक्षणमाहितम् ।
इत्येवं षडुपाङ्गस्य वैभवश्च यथाक्रमम् ॥ ४०४ ॥

व्याख्यातश्च यथातत्त्वं तथोपाङ्गं च सप्तमम् ।
सिद्धान्तनाम चाख्यातं तत्समाहारधर्मवत् ॥ ४०५ ॥

दर्शनं चेति संज्ञापि ह्युपाङ्गानां च दर्शिता ।
अध्यापनं चाध्ययनमुपाङ्गानां यथाक्रमम् ॥ ४०६ ॥

एवं प्रणवबोधे च वर्णितं स्यान्महर्षिणा ।
अधीत्याङ्गं प्रथमतस्तथोपाङ्गं ततोऽभ्यसेत् ॥ ४०७ ॥

पश्चाद्वेदः समध्येयः साङ्गोपाङ्गं यथेप्सितम् ।
ब्रह्म विज्ञाय संसारे ब्रह्मकार्यं सदा चरेत् ॥ ४०८ ॥

सर्वं विज्ञाय चैकस्थमोङ्कारं प्रणवावृतम् ।
अनन्तत्वमतीतत्वमनादित्वं प्रजप्यताम् ॥ ४०९ ॥

इत्येतच्च महार्थं स्यान्महर्षेर्वचनं परम् ।
विचार्यमेतद्विद्वद्भिर्यथाज्ञानं यथावयः ॥ ४१० ॥

तस्मादित्थंभूतमेतत्प्रपञ्चपरमेव च ।
सर्वसिद्धं च सर्वस्थं सर्वान्तर्गतमेव हि ॥ ४११ ॥



संसारबोधरूपं च प्रणवार्थपरं सदा ।
वेदवेदाङ्गोपाङ्गं च विज्ञेयमिति निर्णयः ॥ ४१२ ॥

ततश्च षोडशेऽस्मिंस्तु तरङ्गे च महर्षिणा ।
स्वरूपं सर्वशास्त्राणां सविमर्शं निरूपितम् ॥ ४१३ ॥

अनेकश्चैव संसारो यथैकानुगतो भवेत् ।
शास्त्रसंसरणं चापि तथैवेति निगद्यते ॥ ४१४ ॥

ततश्चाङ्गोपाङ्गसंस्थं सर्वं शास्त्रं व्यवस्थितम् ।
ज्ञानादिभिश्चतुर्भिश्च शास्त्रं सर्वं विभज्यते ॥ ४१५ ॥

श्रौतं स्मार्तं धर्मशास्त्रं सिद्धान्तं चेति तद्भवेत् ।
श्रौतं च ज्ञाननिष्ठं स्यात्स्मार्तं चैव क्रियापरम् ॥ ४१६ ॥

इच्छापरं धर्मशास्त्रं समाहारपरं तथा ।
सिद्धान्तशास्त्रमिति तान्युक्तानि च यथाविधि ॥ ४१७ ॥

श्रौतस्मार्ताख्यशास्त्राभ्यां भावाभावौ यथाक्रमम् ।
एकत्वानेकत्वयुक्तौ तदात्मानात्मतत्परौ ॥ ४१८ ॥

भवेतामुदितौ चाथ धर्मशास्त्रं विशेषतः ।
कर्तव्यस्याऽकर्तव्यस्य यथारूपं नियामकम् ॥ ४१९ ॥

भवेदिच्छापरत्वाच्च सिद्धान्तं शास्त्रमुत्तमम् ।
अखण्डत्वं च जीवस्य सर्वस्थत्वं च बोधयत् ॥ ४२० ॥

तत्समाहारपरं स्यादिति शास्त्रं विचारितम् ।
एवं च सर्वशास्त्राणि विचार्याणि भवन्ति हि ॥ ४२१ ॥

अतः सर्वेश्वरस्त्वात्मा सर्वनिष्ठः सनातनः ।
स एव समुपास्यः स्याद्यदन्यत्परिदृश्यते ॥ ४२२ ॥

तत्सर्वं तद्विशिष्टं स्यात्तादृशं चेति निश्चयः ।
उभाभ्यामेव तद्ब्रह्म त्र्यक्षरं परिबुध्यते ॥ ४२३ ॥

तृतीये च प्रकरणे त्वेवं षोडशभिः क्रमात् ।
तरङ्गैश्च सुविज्ञेयो योऽर्थश्चेत्थं स चोच्यते ॥ ४२४ ॥

जिज्ञासुभिर्धर्मरूपमिदं वेद्यं यथाक्रमम् ।
वस्तु कार्यं कारणं च तत्र कार्यं जगद्भवेत् ॥ ४२५ ॥

दृश्यमानं जगन्नाना संविभक्तं विभाव्यते ।
पशुर्मनुष्यः पक्षी च ये च स्थावरजङ्गमाः ॥ ४२६ ॥

सर्वमेतज्जगद्वाच्यमिति शास्त्रैरुदीर्यते ।
प्रत्यक्षानुभवाच्चापि तदेवं चेति बुध्यते ॥ ४२७ ॥

तद्विभक्तजगद्योगावेशेनैव हि कारणम् ॥
वस्तु नानास्वरूपं च नानाजातिगुणक्रियम् ॥ ४२८ ॥

नानावस्थं भवेच्चेति सम्यगेवावगम्यते ।
यच्चैवं कारणं वस्तु सर्वत्र परिदृश्यते ॥ ४२९ ॥



जीव इत्येव संज्ञाऽस्य सर्वशास्त्रैरुदीर्यते ।
प्रत्येकं च शरीराणां भिन्नो जीवश्च दृश्यते ॥ ४३० ॥

जगदेव शरीरं स्यात्तच्च जीवस्य योगतः ।
भवेत्कार्यक्षमं चेति सुस्पष्टमवगम्यते ॥ ४३१ ॥

अतः कर्ता च भोक्ता च कारणं परमेश्वरः ।
आत्मा च परमात्मा च परं ब्रह्म च शाश्वतम् ॥ ४३२ ॥

उपास्यश्च स एव स्यात्प्रेप्सुभिश्च परं पदम् ।
इति शास्त्रैः प्रसिद्धैश्च व्यक्तमेव हि बुध्यते ॥ ४३३ ॥

प्राकृतो मानुषो लोको ह्ययमस्ति सनातनः ।
प्रत्यक्षावगमश्चापि तत्र वर्तामहे वयम् ॥ ४३४ ॥

मान्धाताद्या महाभागा राजानश्च महर्षयः ।
तथा भागवताश्चैव बुद्धाद्या योगिनस्तथा ॥ ४३५ ॥

अन्ये च संप्रसिद्धा ये त्वाचार्याः शङ्करादयः ।
अस्माकं पितरोऽन्ये च बान्धवाश्च परं गताः ॥ ४३६ ॥

ते सर्वे च कथं जाता लोकेऽस्मिन्नवसन्कथम् ।
शरीरं भोगायतनं त्यजन्तिस्म कथं नु ते ॥ ४३७ ॥

सर्वेषां चैवमुक्तानां व्यवसायश्च कीदृशः ।
सर्वमेतदशेषेण विज्ञेयं स्यान्मनीषिभिः ॥ ४३८ ॥

विचार्यमाणे सर्वस्मिन्नस्मिन्नेवं हि बुध्यते ।
सृष्टिः स्थितिर्लयश्चास्य लोकस्यास्त्येव शाश्वतः ॥ ४३९ ॥

सर्वेषां व्यवसायश्च प्रत्येकं च यथागुणम् ।
प्रशस्तश्चाप्रशस्तश्च दृश्यते हि तथा पुनः ॥ ४४० ॥

तत्परं चापरं चैव स्थानं सर्वत्र दृश्यते ।
सन्ति सर्वस्य कार्यस्य कारणान्यत्र पञ्च हि ॥ ४४१ ॥

तथा सर्वं जगत्तन्त्रं ह्यधीनं कस्य चिद्भवेत् ।
इति विज्ञेयमेव स्यात्सर्वैः सद्भिर्विशेषतः ॥ ४४२ ॥

येऽवतीर्णा महात्मानो जगदभ्युदयाय हि ।
पूर्वोक्ताश्चैव तेषां तु व्यवसायः परोदयः ॥ ४४३ ॥

प्रशस्तः परमश्चास्तीत्याचार्यैः समुदीर्यते ।
प्रशस्तव्यवसायश्च ब्रह्मकार्यप्रवर्तकः ॥ ४४४ ॥

सन्यासत्यागसंशुद्धस्वभावः शास्त्रवर्त्मगः ।
यश्च सोऽयं पुमान्दिव्यं परं स्थानं समश्नुते ॥ ४४५ ॥

व्यवसायश्चैवमेव व्याख्यातः स्यान्महर्षिणा ।
स्वस्वरूपानुरूपश्च कर्तव्यत्वेन निश्चितः ॥ ४४६ ॥

निश्चयात्मा परस्थानप्रापकश्चैव यो भवेत् ।
सोऽयं स्याद्व्यवसायश्चेत्ययं धर्मः सनातनः ॥ ४४७ ॥



सर्वेषां व्यवसायश्च पुरुषार्थप्रदः स्वयम् ।
प्रत्येकमेव चाभाति यथाकालं यथावयः ॥ ४४८ ॥

यथारूपं यथादेशं यथाविज्ञानमेव च ।
इति शास्त्रार्थतत्त्वज्ञैः प्रोक्तश्चास्त्यत्र तत्त्वतः ॥ ४४९ ॥

स चायं प्रवृत्तिपरो निवृत्तिपर इत्यपि ।
द्विविधः कथ्यते तत्र चात्मार्थो विद्यते हि यः ॥ ४५० ॥

स निवृत्तिपरः प्रोक्तो यश्च संसारतत्परः ।
स प्रवृत्तिपरो ज्ञेयस्ताभ्यां शुद्धोऽन्य उच्यते ॥ ४५१ ॥

इत्युक्तैर्व्यवसायैश्च व्यवसायपरैस्तथा ।
संपूर्णो मानुषो लोकश्चाभात्येव निरन्तरम् ॥ ४५२ ॥

सर्वेषां व्यवसायानां विज्ञानं कारणं भवेत् ।
शास्त्राभ्यासाच्च विज्ञानं वास्तवं ह्यभिजायते ॥ ४५३ ॥

यथावस्थं च विज्ञानभेदस्यात्र हि दर्शनात् ।
शास्त्राणां चैव भेदोऽपि बुध्यते हि यथाक्रमम् ॥ ४५४ ॥

ततो लोकश्च कर्ता च व्यवसायश्च साधनम् ।
शास्त्रं चेतीह चत्वारि बुध्यन्ते धर्मगामिभिः ॥ ४५५ ॥

अधिष्ठानं भवेल्लोकः कर्ता स्यात्कर्मकारकः ।
चेष्टा च व्यवसायः स्यात्करणं शास्त्रमुच्यते ॥ ४५६ ॥

अत्र यत्पञ्चमं वस्तु तदैवमिति कथ्यते ।
सर्वेषां कारणानां च परमं तच्च वै भवेत् ॥ ४५७ ॥

शरीरवाङ्मनोभिर्यत्कर्म प्रारभते नरः ।
न्याय्यं वा विपरीतं वा पञ्चैते तस्य हेतवः ॥ ४५८ ॥

इति कारणगीतार्थाल्लोकतन्त्रं च बुध्यते ।
तस्मादस्य तु लोकस्य पुमान्कश्चिन्नियामकः ॥ ४५९ ॥

ब्रह्मप्रतिनिधिश्चैव ब्राह्म्या शक्त्या समन्वितः ।
सर्वज्ञः सर्वसाक्षी च वर्तते परमेश्वरः ॥ ४६० ॥

सोऽयं भवेन्महाविष्णुर्लोकसूत्रप्रवर्तकः ।
ब्रह्मा विष्णुः शिवश्चैव नरनारायणौ तथा ॥ ४६१ ॥

अन्ये चैव महात्मानः सर्वे च परमर्षयः ।
महाविष्णोर्नियम्याश्च भवन्तीति हि निर्णयः ॥ ४६२ ॥

ब्रह्माण्डस्य कस्य चिच्च महाब्रह्मा नियामकः ।
महाशिवः कस्य चिच्च भवेदेवं नियामकः ॥ ४६३ ॥

ब्रह्माण्डे च महाविष्णोर्नियम्ये मानुषा वयम् ।
वर्तामहे चेति सम्यङ्मुनिना ह्यभिवर्णितम् ॥ ४६४ ॥

लोकाधिपानां सर्वेषां प्रत्येकं नियता भवेत् ।
यथाधिकारं विद्या च ताभिश्चैव तथा पुनः ॥ ४६५ ॥



लोकाधिकारिभिश्चैव यथावस्थं यथाक्रमम् ।
शिक्षितः पुरुषः साधु साङ्गोपाङ्गान्यथाविधि ॥ ४६६ ॥

सोपवेदानशेषांश्च वेदाञ्छाखासमन्वितान् ।
यथाकालं यथार्थं च यथाक्रममतन्द्रितः ॥ ४६७ ॥

विद्वान्धर्मस्य विज्ञाता व्यवसायपरः शुचिः ।
अवस्थाचतुष्टयात्म सर्वं च त्रितयात्मकम् ॥ ४६८ ॥

समष्टिव्यष्टिरूपेण शास्त्रेण प्रणवेन हि ।
परिबुध्य यथाप्रज्ञं स्वानुरूपाणि सर्वशः ॥ ४६९ ॥

कुर्वन्नेवेह कर्माणि प्राप्नोति परमं पदम् ।
तृतीये प्रकरणे च ह्येवं षोडशभिः पुनः ॥ ४७० ॥

तरङ्गैश्च यथातत्त्वं शास्त्रार्थश्च विचाररतिः ।
विज्ञेयः सर्वथा सद्भिरयं विज्ञानसाधनम् ॥ ॥ ४७१ ॥

**इति श्रीयोगानन्दविरचितायां प्रणववादार्थदीपिकायां**
**शास्त्रार्थस्वरूपनिरूपणं नाम**
**चतुर्थोऽध्यायः ॥**

---

ॐ

# अथ पञ्चमोऽध्यायः ॥

अथातः पञ्चभिश्चैव तरङ्गैर्हि महर्षिणा ।
सर्वशास्त्रार्थतत्त्वज्ञैर्व्यवसायद्वयास्थितैः ॥ १ ॥

यच्च परप्रेप्सुभिस्तु विज्ञेयं सर्वतः परम् ।
आद्यैः कैवल्यगीतायां श्लोकैः सप्तभिरीरितम् ॥ २ ॥

ब्रह्मस्वरूपगीतायां तथान्यत्र विचारितम् ।
तद्ब्रह्मरूपमात्मादिभेदभावेन भावितम् ॥ ३ ॥

वर्णितं सप्रकारं च विज्ञानक्रमभूषितम् ।
अस्ति तत्सर्वविद्यानां फलं स्यादिति निर्णयः ॥ ४ ॥

आत्मा च परमात्मा च सूत्रात्मा च तथा परः ।
जीवात्मा प्रत्यगात्मेति ह्यात्मभेदा भवन्ति च ॥ ५ ॥

जगत्यस्मिन्परं ब्रह्म नामरूपादिवर्जितम् ।
नेति नेतीति कथितमेवं भावेन भासते ॥ ६ ॥

तत्र सप्तदशे चास्मिन्तरङ्गे तु महर्षिणा ।
यत्सूत्रात्मस्वरूपं च ब्रह्म तच्चाभिवर्णितम् ॥ ७ ॥



समष्टिव्यष्टिरूपौ च भावौ प्रणवभाषितौ ।
सार्वत्रिके च विषये ताभ्यां चैव यथाक्रमम् ॥ ८ ॥

एकत्वपृथक्त्वयोश्च भवेन्निर्धारणं तथा ।
यथाक्रमं चैव ताभ्यां जातिव्यक्तिश्च बुध्यते ॥ ९ ॥

ये स्युः समानजातीयास्तेषां चैकत्वमुच्यते ।
तत्समष्टिप्रयुक्तेन संबन्धेनेति निर्णयः ॥ १० ॥

पूर्णत्वं च समष्ट्या स्याद्व्यष्ट्या च स्यादपूर्णता ।
पूर्णत्वेनैरपेक्ष्यं स्यादपूर्णत्वे हि जायते ॥ ११ ॥

सापेक्षत्वमिति ज्ञेयं ततो ह्येवं हि बुध्यते ।
जातिव्यक्त्योः परस्परं सापेक्षत्वमिति स्वतः ॥ १२ ॥

समष्ट्युपहितो यश्च चेतनो भगवान्परः ।
सूत्रात्मेत्यत्र गदितः सोऽयं भवति चेश्वरः ॥ १३ ॥

एकस्मिन्नेव सूत्रे च प्रोता मणिगणा यथा ।
तथा सूत्रात्मनि प्रोतं जगत्सर्वं चराचरम् ॥ १४ ॥

संसारमात्रे चैतस्मिन्यदेकत्वं निगद्यते ।
तच्च सूत्रात्मनियतं चेति ज्ञेयं मनीषिभिः ॥ १५ ॥

एवं व्यष्ट्यवस्थितानां सर्वेषामात्मनां पुनः ।
एकत्वेनैव भानं तु सूत्रात्मत्वेन जायते ॥ १६ ॥

संसारनियतश्चैव सूत्रात्मा भवति स्वयम् ।
महाविष्णुबुद्धिकार्यश्चेति गर्गसुतोदितम् ॥ १७ ॥

तथैव हि महाविष्णोर्नियम्यश्चेति भाषितः ।
सूत्रात्मनोऽप्यणुत्वं च परदृष्ट्या निगद्यते ॥ १८ ॥

किञ्च सूत्रात्मनोऽप्येवं जीवसंज्ञा ह्युदाहृता ।
प्राणान्क्षेत्रज्ञरूपेण धारणादत एव हि ॥ १९ ॥

यच्चान्तः संप्रविष्टं च स्वयं बद्धं सनातनम् ।
सर्वशास्त्रपरं ब्रह्म तच्च सूत्रात्मसंज्ञकम् ॥ २० ॥

भवतीति हि सिद्धान्तः सप्रकारमिहोदितः ।
अतः सूत्रात्मविज्ञानं व्यवसायसुसाधनम् ॥ २१ ॥

एवं सूत्रात्मनश्चैव कार्यं त्रिविधमुच्यते ।
तच्चावरोधानुरोधारोधरूपमितीर्यते ॥ २२ ॥

यच्चाद्दमः स्वरूपं च ह्यात्मनिष्ठमकारगम् ।
ज्ञानावृतं तथा तच्च दृष्ट्वा स्यादनुरोधजम् ॥ २३ ॥

कार्यं चेति तथा द्वाभ्यां ताभ्यामज्ञेयमेव हि ।
आरोधजं केवलं च कार्यं स्यादिति निर्णयः ॥ २४ ॥

एवं सूत्रात्मकार्यस्य विज्ञाता परमः पुमान् ।
समदुःखसुखः स्वस्थः परकार्याय सज्जते ॥ २५ ॥



परमात्मा परो यश्च शाश्वतः सर्वकारकः ।
स्वयं सिद्धः स्वयं भूतो ह्यकारार्थः प्रभासते ॥ २६ ॥

सूत्रात्मा चापरस्तस्मात्संसारस्य नियामकः ।
उकारवाच्यस्ताभ्यां तु परं ब्रह्म सनातनम् ॥ २७ ॥

नेति नेतीति कथितं सर्वातीतमगोचरम् ।
तस्मात्परमात्मना च तथा सूत्रात्मनापि च ॥ २८ ॥

सर्वसंसारकार्यं च भवतीति हि निर्णयः ।
एवमन्ये विशेषार्था विज्ञेयाश्चात्र सर्वशः ॥ २९ ॥

महर्षिणा निगदिताः विचार्यास्ते मुमुक्षुभिः ।
इति सप्तदशस्यास्य तरङ्गस्यार्थ ईरितः ॥ ३० ॥

अथ चाष्टादशे ह्यस्मिन्तरङ्गे तु महर्षिणा ।
व्याख्यातं स्याद्यथातत्त्वं स्वरूपं प्रत्यगात्मनः ॥ ३१ ॥

तथैव मूलप्रकृतेः देव्याश्च प्रकृतेस्तथा ।
प्रणवार्थपरत्वं च त्रयाणां प्रतिपादितम् ॥ ३२ ॥

यो हि स्वक्रियया चैव सर्वं प्रति च गच्छति ।
प्रत्यगात्मा स विज्ञेयः सर्वसंस्थश्च शाश्वतः ॥ ३३ ॥

स क्रियान्तर्गतः शुद्धः सर्वोपेतश्च केवलः ।
क्रियाप्रवर्तकः सर्वसंपन्नश्चेति बुध्यते ॥ ३४ ॥

अहमो व्यष्टिभावश्च संसार इति मन्यताम् ।
संसारव्यष्टिभावश्च ह्येवमात्मेति बुध्यते ॥ ३५ ॥

समष्टिभावे सर्वेषां वृत्तिरेकैव विद्यते ।
यो ह्यहं स च नैतत्स्याद्यो ह्येतत्स च नात्यहम् ॥ ३६ ॥

यो हि न स नाहमेतदिति व्याख्यानतो भवेत् ।
कार्यं पृथक्पृथक्चेति विज्ञेयं स्यान्मनीषिभिः ॥ ३७ ॥

अहमा कथितो ह्यात्मा संसारश्चैतदा तथा ।
नकारेण परं ब्रह्म शक्तिस्तस्य च कथ्यते ॥ ३८ ॥

तस्माद्यावल्लोकमहमेव सर्वं प्रकाशते ।
कार्योपलक्षितं तच्च स्वरूपं प्रत्यगात्मनः ॥ ३९ ॥

अनात्मिका भवेन्मूलप्रकृतिः सृष्टिकारणम् ।
एतन्निष्ठा चाणुरूपा भवेत्सा च परा मता ॥ ४० ॥

प्रकर्षेण च या मूलं करोति स्वयमेव हि ।
सा मूलप्रकृतिश्चेति कथ्यते योगभावतः ॥ ४१ ॥

प्रत्यगात्मस्वरूपं च यत्तन्मूलं हि कथ्यते ।
तस्य प्रदर्शनादेव मूलप्रकृतिरित्यतः ॥ ४२ ॥

तस्याश्च मूलप्रकृतेस्तथैव प्रत्यगात्मनः ।
योगादेव हि सर्वं च नियतं संप्रकाशते ॥ ४३ ॥



मूलप्रकृत्या तु तमः प्रकाशः प्रत्यगात्मना ।
पूर्वमेवात्र कथितमतस्ताभ्यां प्रकाशते ॥ ४४ ॥

संसारश्चैव सर्वोऽपि सांसारिक्यः क्रियास्तथा ।
भावाभावप्रकाशश्च ताभ्यां योगेन जायते ॥ ४५ ॥

त्रिगुणा मूलप्रकृतिः प्रत्यगात्मा च शाश्वतः ।
स्पष्टं प्रकृतिगीतायां व्याख्यात इति निर्णयः ॥ ४६ ॥

प्रत्यगात्मोपसकानां पुरुषार्थः परार्थदः ।
भूतप्रकृतिमोक्षश्च तुरीयः समुदाहृतः ॥ ४७ ॥

सर्वेषां चैव कार्याणां क्षेत्रे चैवास्य योगतः ।
सञ्जायमानत्वादेव प्रत्यगात्मा च कार्यवान् ॥ ४८ ॥

क्षेत्रज्ञ इति विज्ञेयो मूलप्रकृतिरेव च ।
क्षेत्रं चेति निगदिता ताभ्यां भाति जगच्च हि ॥ ४९ ॥

क्षेत्रज्ञ एवाक्षरः स्यात्कर्मसाक्षी जगत्प्रभुः ।
प्रथमं योगिभिश्चायमेव सर्वैरुपास्यते ॥ ५० ॥

तस्माच्छुद्धो ह्येतदर्थो मूलप्रकृतिसंज्ञया ।
कथितोऽस्तीति सिद्धान्तः प्रशस्तः परिदृश्यते ॥ ५१ ॥

स्वातन्त्र्यं पारतन्त्र्यं च क्षेत्रक्षेत्रज्ञयोरपि ।
विवक्षया हि नियतं भवतीत्यत्र भाषितम् ॥ ५२ ॥

स्वयमसत्स्वरूपा च मूलप्रकृतिराहिता ।
वर्तते सदसद्रूपा तत्तद्वस्तु प्रभावतः ॥ ५३ ॥

अनन्तनामरूपा च भाति कारणरूपिणी ।
नानावस्था बन्धरूपा तत्त्वानां प्रथमा च सा ॥ ५४ ॥

सा मूलप्रकृतिश्चैव माया गुणमयी मता ।
उकारार्था ब्रह्मशक्तिः सर्वसंसारतत्परा ॥ ५५ ॥

प्रत्यगात्मा त्वकारार्थश्चेत्यत्र हि निरूपितः ।
मकारार्थश्च योगः स्यादिदिति ज्ञेयं मनीषिभिः ॥ ५६ ॥

देवी प्रकृतिरेवं स्यादात्मनश्च ह्यनात्मनः ।
ऐक्यस्य तद्विरोधस्य भवेदावश्यकत्वतः ॥ ५७ ॥

भवेत्सेयमिकारार्था शक्तिर्देवी निगद्यते ।
अकारोकारयोर्मध्यवर्तिनी चेति निर्णयः ॥ ५८ ॥

या स्याच्च देवी प्रकृतिस्तस्यामन्तर्गता भवेत् ।
मूलप्रकृतिरेवं हि तस्यां चान्तर्गतो भवेत् ॥ ५९ ॥

प्रत्यगात्मा तथा चैव देवी प्रकृतिरेव सा ।
तयोरावश्यकी शक्तिरूपा चेति निरूपिता ॥ ६० ॥

अनया दीव्यते शक्तिरिति देवीति चोच्यते ।
प्रकृतिस्तु स्वभावः स्यात्प्रकृत्यर्थोऽयमुच्यते ॥ ६१ ॥



भवनं च प्रकृष्टेन स्वयत्नेन यया भवेत् ।
सेयं प्रकृतिरित्येव कथ्यतेऽत्र च योगतः ॥ ६२ ॥

द्विविधा प्रकृतिश्च स्याद्देवी प्रकृतिरेव च ।
मूलप्रकृतिरित्येव कथ्यतेऽत्र महर्षिणा ॥ ६३ ॥

या मूलप्रकृतिं चैव प्रत्यगात्मानमेव च ।
अभिद्योतयतीत्यत्र सा देवी परिकथ्यते ॥ ६४ ॥

यया मूलप्रकृतेश्च तथा च प्रत्यगात्मनः ।
प्रकाशोऽनुभवश्चैव ह्यनेकः सा हि कथ्यते ॥ ६५ ॥

देवी प्रकृतिरेवेति पुनश्चैवमियं भवेत् ।
योगस्यावश्यकत्वेन योगमायेति संज्ञया ॥ ६६ ॥

अतीतप्रवचने च भवेत्सार्वत्रिके पुनः ।
मायेति संज्ञा प्रोक्तात्र देवी प्रकृतिरित्यपि ॥ ६७ ॥

संसारप्रवचने च संज्ञा स्यादिदिति निर्णयः ।
एवं ह्यनेकधा चैव प्रकृतिः परिकथ्यते ॥ ६८ ॥

तस्मान्मूलप्रकृतेश्च देव्याश्च प्रकृतेस्तथा ।
तत्प्रत्यगात्मनश्चैव स्वरूपञ्च यथाक्रमम् ॥ ६९ ॥

यथारूपं च विज्ञाय प्रणवार्थविचारतः ।
सर्वं संसारकार्यं च कुर्वन्नेवमतद्रितः ॥ ७० ॥

ब्रह्मसामीप्यमाप्नोति शुद्धविज्ञानलक्षणः ।
अष्टादशतरङ्गार्थसंग्रहश्चेत्थमीरितः ॥ ७१ ॥

ततश्चैकोनविंशेऽस्मिन्तरङ्गे तु महर्षिणा ।
जीवात्मधर्मो भवति व्याख्यातश्च यथायथम् ॥ ७२ ॥

यः क्रीडति च संसारे सुखदुःखादिभिः सह ।
ईश्वरस्य बिंबभूतः संसारात्मप्रयोगजः ॥ ७३ ॥

सोऽयं भवति जीवात्मा प्रबद्धश्च गुणैस्त्रिभिः ।
त्रित्वैकत्वस्वरूपे च ब्रह्मभावेऽयमेव हि ॥ ७४ ॥

अखण्डो ह्यणुरूपश्च सर्वज्ञः सर्वभाववान् ।
पूर्णश्च शाश्वतो नित्यः स्वसंवेद्यः प्रकाशते ॥ ७५ ॥

जीवात्मा च यदा वेद स्वात्मानं चेत्थमेव हि ।
जगदित्थमहं चेत्थमेतदित्थं तथा पुनः ॥ ७६ ॥

भाव्यं च भवनं चेत्थमित्यादि च तदा त्वयम् ।
स्वयं ब्रह्मस्वरूपश्च भवत्येवेति निर्णयः ॥ ७७ ॥

सुखदुःखानुभवश्च तथा चायं हि जायते ।
जीवति म्रियते चेति व्यवहारस्तथा पुनः ॥ ७८ ॥

शोको हर्षश्चेति सर्वं तदा तस्य न जायते ।
तस्माज्जीवब्रह्मणोश्च ह्यैक्यं विधिनिरूपितम् ॥ ७९ ॥



एवमन्ये विशेषार्था जीवात्मज्ञानतत्पराः ।
तरङ्गेऽस्मिन्विशेषेण प्रोक्ताः सन्ति महर्षिणा ॥ ८० ॥

ततो विंशे तरङ्गेऽस्मिन्गार्ग्यायणमहर्षिणा ।
जीवात्मयोगो व्याख्यातो यथातत्वं विशेषतः ॥ ८१ ॥

तौ भेदसूचकौ शब्दौ युष्मदस्मदिति श्रुतौ ।
उभौ भवेतां तत्रास्ति ह्यसन्धिस्थो निरामयः ॥ ८२ ॥

अस्मच्छब्दाभिधेयश्च ह्ययमात्मा तथा पुनः ।
युष्मच्छब्दे ह्याद्यवर्णश्चेकारोकारसन्धितः ॥ ८३ ॥

यु चेति सम्यगाभाति प्रसिद्धं रूपमेव हि ।
युष्मच्छब्दस्यैवमेव निरुक्तं च महर्षिणा ॥ ८४ ॥

तस्य संभावनयैव नानात्वं परिदृश्यते ।
युष्मच्छब्दस्य भवनं त्वस्मच्छब्देन जायते ॥ ८५ ॥

आभ्यां द्वाभ्यां च शब्दाभ्यां भेदश्च परिकथ्यते ।
अस्मद्युष्मच्छब्दवाच्यौ भवतश्च क्रमादिमौ ॥ ८६ ॥

उक्तौ च ह्यात्मसंसारौ ह्यकारोकारतत्परौ ।
तयोः परस्परं चैव सापेक्षत्वमिहोच्यते ॥ ८७ ॥

एकत्वं च तथा तौ द्वौ त्वन्यस्य स्तो ह्यपेक्षकौ ।
तस्मात्तयोरभेदश्च तथान्येषामिहोदितः ॥ ८८ ॥

केवलं भेदवचनशब्दानां सर्वथैव हि ।
तदैक्यविरोधवत्वं तथा चैकत्वमेव च ॥ ८९ ॥

विज्ञेयमिति चात्रोक्तमृषिणा च प्रयोजनम् ।
तस्मात्पृतक्तं सर्वेषामेकत्वं च तथा मतम् ॥ ९० ॥

तावैक्यपृथक्त्वमूलौ रागद्वेषौ व्यवस्थितौ ।
आवश्यकपरावेतौ शत्रुमित्रे तथा मते ॥ ९१ ॥

तयोरनावश्यकत्वदोषश्चापि भवेदतः ।
रागद्वेषौ शत्रुमित्रे द्विविधे परिकथ्यते ॥ ९२ ॥

एकं कारणरूपं स्यात्कार्यरूपं तथाऽपरम् ।
कार्यरूपं प्रसिद्धं स्याच्चावश्यकपरं तथा ॥ ९३ ॥

तच्च कारणरूपं स्यादप्रसिद्धं तथा मतम् ।
परं त्वावश्यके चैव सर्वस्मिन्नयमेव हि ॥ ९४ ॥

अभेद एव भवति चेति व्याख्यातृसंमतम् ।
तदात्मैक्यविरोधाच्च द्वेषः समभिदृश्यते ॥ ९५ ॥

तदात्मैक्यानुरोधेन रागश्च परिवर्धते ।
द्वयं चावश्यकपरं तदिदं परिदृश्यते ॥ ९६ ॥

तदेकान्तर्गतोऽभेदश्चैकस्थः परिबुध्यते ।
तदवयवावयविभावेनेति निरूपितम् ॥ ९७ ॥



प्रकृतीनां च सर्वासामात्मादीनां च सर्वशः ।
प्रत्येकं यत्परिज्ञानं तत्पृथक्त्वेन जायते ॥ ९८ ॥

यदेकत्वेन विज्ञानं सर्वेषां चैव जायते ।
तत्परं ब्रह्मेति गीतमिति ज्ञेयं मनीषिभिः ॥ ९९ ॥

सर्वमात्मेति विज्ञेयमात्मतत्त्वविचक्षणैः ।
समुपास्यः सोऽयमात्मा वेद्यो ध्येयश्च सर्वथा ॥ १०० ॥

एवं ज्ञानानुरोधि स्यात्कर्म सर्वं फलप्रदम् ।
न ज्ञानेन विना कर्म क्रियते च मुमुक्षुभिः ॥ १०१ ॥

देशकालाद्यतीतत्वं कर्मणामिह कथ्यते ।
आत्मदृष्ट्या तथा तेषां संसारप्रविभावनात् ॥ १०२ ॥

कालाद्यन्तर्गतत्वं च मुनिना प्रतिपादितम् ।
ततः सर्वक्रियाणां च ह्यनन्तत्वं प्रकीर्तितम् ॥ १०३ ॥

एवं तत्कर्मभिश्चैव तदीशैरपि च स्वयम् ।
ब्रह्माण्डं सर्वमपि च युक्तं चास्तीति निर्णयः ॥ १०४ ॥

प्रतिब्रह्माण्डमत्र स्युः ह्यणवस्त्रितयात्मकाः ।
ब्रह्माण्डाधिपतिश्चैव महाविष्णुप्रकीर्तितः ॥ १०५ ॥

तस्मिन्तस्मिंश्च ब्रह्माण्डे जीवानां वसतां पुनः ।
एवमुत्क्रमणं चास्ति मुनिनात्र निरूपितम् ॥ १०६ ॥

ब्रह्माण्डेऽस्मिंश्च सञ्जीवः स्वयं वस्तूनि सर्वशः ।
विज्ञाय च यथातत्त्वं ब्रह्माण्डान्तरमेति च ॥ १०७ ॥

इत्येवं हि जगद्विश्वसंसारेभ्यो यथामति ।
जीवस्योत्क्रमणं ज्ञेयं तपोयोगसमाहितम् ॥ १०८ ॥

इत्थमत्र हि सिद्धान्तः पूर्वाचार्यनिरूपितः ।
जीवस्य च यथाज्ञानं यथावस्थं यथाविधि ॥ १०९ ॥

यथाक्रमं यथाकालं भवेदुत्क्रमणं परम् ।
इत्येवं प्राकृताणूनां तच्चापि परिदृश्यते ॥ ११० ॥

तस्य ह्युत्क्रमणस्यापि तथानन्तत्वमुच्यते ।
किञ्चोत्तरोत्तरे चैव तस्मिन्नुत्क्रमणे पुनः ॥ १११ ॥

विशेषतः स्वभावश्च तत्तद्दृष्टिविवर्धितः ।
वर्तते चास्य जीवस्य तस्मात्सर्वस्य तस्य हि ॥ ११२ ॥

स्वभावः प्राकृतश्चापि तथात्मीयश्च वर्धते ।
इत्थमुत्क्रममाणस्य जीवस्य हि विशेषतः ॥ ११३ ॥

निष्ठा बुद्धिर्धृतिश्चैव गुणः कालः क्रमस्तथा ।
मार्गः फलं च परमं चेति सर्वं यथार्थतः ॥ ११४ ॥

उक्तं च मोक्षगीतायां वासुदेवमहात्मना ।
इदं च परमं वेद्यं मुमुक्षुभिरिहादरात् ॥ ११५ ॥



तस्य चोत्क्रममाणस्य शक्तिसंपादनाय हि ।
आरंभावसानरूपे मन्दताकृष्टते च ये ॥ ११६ ॥

नियते चैव ताभ्यां तु जगज्जन्मादिकं भवेत् ।
अत एव त्वणूनां हि विनाशः परिबुध्यते ॥ ११७ ॥

तस्माच्च सर्वभावोऽपि जीवेन प्रतिपद्यते ।
यथाज्ञानं यथाकर्म यथाक्रममितीरितम् ॥ ११८ ॥

अतो ह्यणूनां जीवानां प्रतिब्रह्माण्डमेव हि ।
अनन्तो व्यवहारश्च धर्मतश्चावगम्यते ॥ ११९ ॥

किं च तेषां स्वभावेन सर्वत्र समुदाहृतः ।
स परस्परयोगश्च नियतः शाश्वतोऽमलः ॥ १२० ॥

आत्मभावभासितोऽपि जीवात्मायं सनातनः ।
अणुरूपश्च सर्वत्र व्यापृतश्च विराजते ॥ १२१ ॥

अणूनां चैव तत्रस्थजीवानां साम्यमेव हि ।
स्वरूपेण स्वभावेन प्रोक्तं सामीप्यलक्षणम् ॥ १२२ ॥

शुद्धाभिः श्रुतिभिश्चेति विज्ञेयं स्यान्मनीषिभिः ।
जीवात्मेति च संज्ञा स्यादात्मसंसारयोगतः ॥ १२३ ॥

एतदोंऽशश्च जीवः स्यात्संसारश्चैतदोच्यते ।
अहमंशो भवेदात्मा स त्वणुश्च सनातनः ॥ १२४ ॥

व्यष्ट्युपाधिस्तयोरेव संयोगः परिकथ्यते ।
जीवानां व्यष्टिपक्षे च नानात्वं परिबुध्यते ॥ १२५ ॥

समष्टिभावे चैकत्वं तेषामित्यत्र चोदितम् ।
एवं व्यष्ट्या समष्ट्या च बोधः प्रणवभाषितः ॥ १२६ ॥

त्रुटीनां चाप्यणूनां हि प्रत्येकं योग एव च ।
वियोगश्च तदैक्यस्य विरोधस्य च तत्क्रमात् ॥ १२७ ॥

भावनायाश्च भवति सर्वत्रैवं हि दृश्यते ।
तत्संयोगवियोगौ च मतावावश्यकाविति ॥ १२८ ॥

अणूनां चैव सर्वेषां प्रत्येकं क्रमयोगतः ।
गमनं चैव संबन्धो लघुत्वं च तथा पुनः ॥ १२९ ॥

महत्वं चेति विज्ञेयं मुमुक्षुभिरिहादरात् ।
सामानाधिकरण्यन्तद्वैयधिकरण्यं च हि ॥ १३० ॥

लघुत्वमहत्वबीजमिति चात्र निरूपितम् ।
अत एव जगत्सर्वं त्वणोरन्तर्गतं भवेत् ॥ १३१ ॥

जगदन्तर्गतं चापि ह्यणुश्चेतीति निर्णयः ।
एवमेव हि सर्वेषां सर्वावश्यकता तथा ॥ १३२ ॥

सर्वत्र प्रयोजनं च सिद्धमित्यनुशासनम् ।
वस्तुतस्त्वयमात्मा तु सर्वशुद्धो विराजते ॥ १३३ ॥



तस्मात्तदात्मविज्ञानं कर्मणां कारणं भवेत् ।
आत्मतत्त्वपरिज्ञानं प्रणवाध्ययनाद्भवेत् ॥ १३४ ॥

तत्त्वज्ञानाच्च मोक्षः स्याद्द्वंद्वभावो न शोभते ।
अतश्च सर्वमूलं स्यादोङ्कारस्तत्त्वलक्षणः ॥ १३५ ॥

इत्थं विंशतरङ्गार्थः संग्रहेण ह्युदाहृतः ।
पुरुषार्थपरैश्चायं वेद्यो भवति सर्वथा ॥ १३६ ॥

अथैकविंशे ह्यस्मिंश्च तरङ्गे तु महर्षिणा ।
सूत्रात्माद्याश्च ये प्रोक्तास्तेषां त्वत्र विशेषतः ॥ १३७ ॥

मुख्यं तत्त्वं यथावच्च व्याख्यातं स्याद्यथाविधि ।
अकारोकारयोर्योगो यश्चात्र प्रतिपादितः ॥ १३८ ॥

व्यवस्थितं च तेनैव सृष्टिमात्रं यथायथम् ।
सूत्रात्माद्याश्चापि सर्वे तद्योगसमवस्थिताः ॥ १३९ ॥

भवन्तीति च सिद्धान्तः सर्वशास्त्रसुसंमतः ।
तद्योगतत्परश्चैव परमात्मा तथैव हि ॥ १४० ॥

परं ब्रह्म भवेच्चेति सिद्धान्तो मुनिसंमतः ।
संसारव्यवहारश्च सर्वस्तेनैव निश्चितः ॥ १४१ ॥

किं चात्र कार्यं सर्वं हि तदावश्यकतत्परम् ।
आवश्यकं कालपरं स चातीतो विभाव्यते ॥ १४२ ॥

अनेकव्यक्तिकश्चेति विज्ञेयं हि मनीषिभिः ।
एवमेव हि संसारेऽप्यनेकाश्च क्रियामताः ॥ १४३ ॥

तथा द्रव्यादयश्चैव सर्वे च त्रितयात्मकाः ।
तस्माच्च संसारपराः सर्वे सन्ति सुनिश्चिताः ॥ १४४ ॥

यद्यपि ह्यणवश्चैव तथा च परमाणवः ।
महद्बुद्धिश्च भूतानि प्रसिद्धा जगदादयः ॥ १४५ ॥

तथापि चात्मसामान्यादैक्याच्च हि विशेषतः ।
तत्सर्वं नाहमिति च बोध्यं स्याच्च यथायथम् ॥ १४६ ॥

तस्मात्तदात्मनश्चैवं भावेनैव जगच्च हि ।
जायते चेति सिद्धान्तः प्रणवादवगम्यते ॥ १४७ ॥

ज्ञानेच्छाक्रियापरश्च नायमात्मा तु यद्यपि ।
तथापि सर्वभवनयोगेन च यथाक्रमम् ॥ १४८ ॥

अहमैक्यविरोधानुरोधेन च तदात्मनः ।
एकत्वं च पृथक्त्वं च सिद्धं चेति विभाव्यते ॥ १४९ ॥

अहमेतन्नेति यच्च त्रितयं तस्य चैव हि ।
पूर्णत्वात्त्रितयं ब्रह्म चेति शास्त्राच्च तादृशम् ॥ १५० ॥

आत्मानं च सदा विद्धीत्युपदेशश्च विद्यते ।
तज्ज्ञानेच्छाक्रियाभ्यश्च ह्याविर्भूतं जगद्भवेत् ॥ १५१ ॥



तच्च मायाविशिष्टं चेत्युच्यते हि महर्षिणा ।
अनेनैव हि भावेन सदसच्च तथा पुनः ॥ १५२ ॥

मिथ्याऽमिथ्या तथा द्वैतमद्वैतं परिदृश्यते ।
तृत्वैकत्वं प्रसिद्धं च तथैवात्र निगद्यते ॥ १५३ ॥

ततश्चेशावास्यमिदं सर्वमित्यादिवेदतः ।
ईशस्य सर्वरूपस्य चोपास्यत्वमिहोदितम् ॥ १५४ ॥

तस्मादहमेतन्नेति सर्वा वाक्यपराः क्रियाः ।
स्युस्तद्वाक्यपरं ज्ञानमिच्छा वाक्यपरा मता ॥ १५५ ॥

भवत्यतश्च सर्वं हि भवेद्वाक्यपरं तथा ।
ओङ्कारो ब्रह्मवाक्यं स्यात्तत्र सर्वं व्यवस्थितम् ॥ १५६ ॥

निर्वर्तनं तथा चैवं परिवर्तनमेव च ।
वाक्यानां चैव सर्वेषां भवेदेव यथाक्रमम् ॥ १५७ ॥

यथाकालं यथादेशं यथावस्तु यथाविधि ।
इदमेव हि संसारफलं चेतीह बुध्यते ॥ १५८ ॥

परिवर्तनपराणि निवर्तनपराणि च ।
अखिलानि प्रमाणानि भवन्तीति च निर्णयः ॥ १५९ ॥

अहमेतदोर्योगाद्धि भवेज्ज्ञानादिकं पुनः ।
ततो व्याख्यानमेवं स्यान्मुनिना हि निरूपितम् ॥ १६० ॥

ब्रह्मभावपूर्वकं च सकलं चेष्टमाप्नुयात् ।
तत्सर्वकरणौचित्यं चेति ज्ञेयं मनीषिभिः ॥ १६१ ॥

एवं संसारधर्मश्च तत्कार्यं तत्प्रयोजनम् ।
महावाक्यरहस्यार्थविचारस्तदनन्तरम् ॥ १६२ ॥

ब्रह्मणश्चैव संसारबोध्यत्वं च निरूपितम् ।
एवमन्ये विशेषार्थास्तरङ्गेऽस्मिन्निरूपिताः ॥ १६३ ॥

तत्संग्रहार्थबोधश्च कारिकाभिः प्रदर्शितः ।
यश्चार्थः पञ्चभिश्चैव तरङ्गैर्मुनिनोदितः ॥ १६४ ॥

इत्थमात्मोपासकैश्च ज्ञानिभिश्च मुमुक्षुभिः ।
ब्रह्मतत्त्वं च विज्ञेयं पूर्वाचार्यानुवर्णितम् ॥ १६५ ॥

परप्रणवशास्त्रस्य शास्त्रस्यान्यस्य च श्रुतः ।
समन्वयेन भवति ह्यर्थबोधः स चोत्तमः ॥ १६६ ॥

ऐतदात्म्यमिदं चेति ज्ञानं स्याज्जगति क्रमात् ।
यदा तदा जगत्सर्वं प्रकृतौ भाति योगतः ॥ १६७ ॥

एवं यदा च विज्ञानं जायते ह्यात्ममण्डले ।
परमात्मनि तत्सर्वं ह्यैक्येन हि विराजते ॥ १६८ ॥

आत्मनि प्रकृतौ चैव विज्ञानं च यदा भवेत् ।
सर्वं ब्रह्मेति च तदा ते भातो ब्रह्मणि स्वयम् ॥ १६९ ॥



ततः सनातनं ब्रह्म चात्मानात्मशरीरवत् ।
तच्चैवात्मस्वरूपं तु सर्वत्र च विराजते ॥ १७० ॥

तद्रूपे ब्रह्मशक्तिश्च समवेता विराजते ।
नानाभूतिमती चैव तस्मादेव परावरम् ॥ १७१ ॥

तच्च वै ब्रह्मणो रूपं शक्तिरेवेति कथ्यते ।
ततः श्रेष्ठाः ब्राह्मशाक्ताः पूज्याः प्रोक्ता भवन्ति च ॥१७२॥

आत्मशाक्तास्तथा चान्ये ह्यपराः परिकीर्तिताः ।
नीचाः प्राकृतशाक्ताः स्युस्तन्त्रशास्त्रार्थतत्पराः ॥ १७३ ॥

ये केवलं ब्रह्म शक्तिं विना हि समुपासते ।
ते निर्गतार्था विज्ञेया भवन्तीति मुनेर्मतम् ॥ १७४ ॥

विद्वानेवं स्वानुरूपकर्मभिश्च परं पदम् ।
प्राप्नोति शुद्धसत्वश्च न तत्स्थानान्निवर्तते ॥ १७५ ॥

ततः समन्वयेनार्थविज्ञानं तु प्रशस्यते ।
भवेज्ज्ञानानुरूपा च शिक्षा प्रणवविद्यया ॥ १७६ ॥

तयैव तद्विरुद्धं च ज्ञानं संजायते यतः ।
समष्टिव्यष्टिभावश्च प्रणवः परिकथ्यते ॥ १७७ ॥

समष्ट्या चैकार्थबोधो व्यष्ट्या नानार्थभावना ।
भवेदिति हि सिद्धान्तो मुनिना प्रतिपादितः ॥ १७८ ॥

राजयोगसुशुद्धेन तपसा संस्कृतं यदा ।
विज्ञानं च भवेदेवं परप्राप्तिस्तदोच्यते ॥ १७९ ॥

तच्छुद्धात्मोपासनैव राजयोग इतीर्यते ।
यत्तद्ब्रह्म परं तच्च पञ्चधा परिदृश्यते ॥ १८० ॥

शुद्धाचार्यैस्तत्प्रकाराः कथ्यन्ते चैवमेव हि ।
पुरुषः परमात्माऽऽत्मा जीवश्चैवाक्षरस्तथा ॥ १८१ ॥

इति तत्र च सर्वेभ्यः पुरुषः पञ्चमः परः ।
तुरीयः परमात्मा स्यात्तृतीयश्चात्मसंज्ञकः ॥ १८२ ॥

द्वितीयो जीवसंज्ञश्च प्रथमश्चाक्षरो मतः ।
संसारोपहितं ब्रह्म चैवं स्याद्गुणकर्मभिः ॥ १८३ ॥

शुद्धा हि योगिनः सर्वे ब्रह्मज्योतिः सनातनम् ।
पञ्चधा प्रभासमानं स्वदेहे समुपासते ॥ १८४ ॥

राजयोगतपश्चैव ब्रह्मोपासनतत्परम् ।
महात्मना गोभिलेन साङ्गं स्यादभिवर्णितम् ॥ १८५ ॥

गार्ग्यायणस्तु भगवानत्र ब्रह्म सनातनम् ।
आत्मा च परमात्मा च सूत्रात्मा च तथाऽपरः ॥ १८६ ॥

प्रत्यगात्मा च जीवात्मा चेत्याह परमं च तत् ।
विचार्यमाणे सर्वस्मिन्भवेत्सर्वं समञ्जसम् ॥ १८७ ॥



एकमेव परं ब्रह्म शुक्लकृष्णस्वरूपवत् ।
आत्मानात्मस्वरूपं च विभात्येवेति निर्णयः ॥ १८८ ॥

यथाब्रह्मस्वरूपं च विद्याः सर्वा भवन्ति हि ।
यथाधिकारं सर्वेषां विद्याश्च नियता मताः ॥ १८९ ॥

एकत्वानेकत्वयुक्तं सर्वं च त्रितयात्मकम् ।
अवस्था चतुष्टयात्म चेति प्रणवभाषितम् ॥ १९० ॥

एवमेवान्तिमैरत्र तरङ्गैः पञ्चभिः पुनः ।
सर्वशास्त्रपरिज्ञानवेद्यं ब्रह्म सनातनम् ॥ १९१ ॥

पञ्चधा संविभक्तं च व्याख्यातं स्यान्महर्षिणा ।
ब्रह्मविच्चैव परमं स्थानं योगेन गच्छति ॥ १९२ ॥

**इति श्रीयोगानन्दविरचितायां प्रणववादार्थदीपिकायां**
**ब्रह्मस्वरूपनिरूपणं नाम**
**पञ्चमोऽध्यायः ॥**

---

द्वितीयभागे चास्मिन्प्रणववादे परिशिष्टतरङ्गपञ्चकार्थसंग्रहकारिकाः प्रणववादार्थदीपिकाख्याः, साकं तृतीयभागेन प्रणववादेन भविष्यन्ति—